CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 592

Title Gādādhari

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 592 Subject: Nyaya.

Title: Gādādhari

Author:

Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10.5" by 4.8" Extent: 19 foll.

Language: Sanskrit. Script: Devanāgari

Remarks: Ends abruptlly

श्रि·टी·ग·

१

॥श्रीगणेशाय नमः॥श्रीसरस्वत्यै नमः॥हरिः ॐ॥ ॥अणिमं वं घमुहुः समादरात्य दपायोजयुगं पुरद्वि
षः। विष्णोर्निगदाधरः सुधीरतिदुर्बोधगिरः शिरोमणेः॥१॥ शारीरिसितसमासिपरिपृंथिप्रत्यूहव्यूहवि
ध्वंसनपटीयसीं परमेश्वरप्रणतिमादौ निबध्नाति॥ ॐमिति॥ समस्तैरकारोकारमकारैः संधिवशेन प्रण
वभावमावहद्भिरव्ययतया लुप्तचतुर्थ्यैकैः प्रत्येकशास्त्येोपस्थापितस्य वासुदेवादिदेवत्रयस्याभेदेन पर
मात्मनो विशेषणत्वमत्राभिमतं। अत्र च जगत्पालनादिकर्तृत्वं नाकारादिपदार्थतावच्छेदकं। उद्देश्यतावच्छे
दकस्य परमपदार्थोत्कर्षस्यापितद्रूपतयानन्वयापत्तेः। अपि तु विग्रहविशेषवत्स्वरूपमेव पदार्थस्य परमा
त्मन एकत्वेपि पदार्थतावच्छेदकानां नारायणादिशरीराणां भेदो हि इत्यस्य साधुतामुपपादयति। यद्यपि जाति
विशेषावच्छिन्नशरीराणां स्वनिष्ठचेष्टानुकूलयत्नवत्स्वरूपपरंपरासंबंधेन प्रवृत्तिनिमित्तत्वापेक्षया धर्मान्तरविशे
षितानामेव शरीरवृत्तिजातिविशेषाणां समवायेन तया त्वमुखितं तथापि सर्वविवेति विष्णुरित्यादिप्रामाणिकप्रयोगानु
रोधाद्विष्ण्वादिपदस्यात्मनि शक्ते निरूढलक्षणाया वावश्यकत्वात्तत्पर्यायस्याकारादेरपि शरीरविशेषावच्छिन्न
परमात्मपरता कुत्यत एव। न तु कस्यचिच्छरीरपरत्वे कथंचिद्योग्यता निर्वहति। शरीरे समवायेन ज्ञानाभावात्। ईश्वरत्व
द्वेव्याप्यवृत्तितयावच्छेदकत्वेनाश्रयत्वस्यार्थत्वार्थतास्वीकारेप्यप्रतीकारात्। स्वसमानाधिकरणाश्रयत्वासाधारणका

ना१ १

रणकचेष्टाश्रयत्वादेरारव्यातार्थत्वे गौरवात्। शरीरविशेषा एव प्रणवार्थः। तेषां च निपातार्थतया भेदान्वय एव परमा
त्मनीति तु न साधु। ओमित्यस्याव्ययपरतया मेव चादयोसत्त्वे इत्यनेन निपातत्वसंभवात्। अनिपातत्वेऽव्ययत्वमेव
कुत इति चेत्। स्वरादिगंतर्गतत्वोपगमात्। विग्रहे तस्याकारादेरनव्ययत्वेपि समस्तस्य तथात्वकल्पने बाधकाभावा
त्। ईश्वरस्य सर्गादिकर्तृत्वे ब्रह्मादीनां तथात्वबोधकागमानामपि प्रामाण्यमिति सूचयितुं तस्य ब्रह्माद्यभेदाभिधान
आगम मिति न तद्वैयर्थ्यमाशंकनीयं। वस्तुतस्तु शरीरविशेषानवच्छिन्ने भगवति ओमिति पदस्य रूढिः। ॐ तत्सदिति निर्देशो
ब्रह्मणस्त्रिविधः स्मृतः। समस्तं व्यस्तं तां शरणं दृष्टणत्ये ओमिति पदमिति बहुतरतत्साधकसत्त्वात्। रूढ्याख्यावच्छे
दकं जगत्कर्तृत्वमेव। एवं च ओमित्येव विशेष्यपदं। तदन्यानि चतुर्थ्यन्तानि सर्वाण्येव विशेषणपराणि। नमः पदं ण।
स्वापकर्षबोधकप्रयोक्तृव्यापारार्थकं। तदेकदेशः स्वतापकर्षान्वयि अवधित्वं अवधिमत्त्वं वा नमः स्वस्तीति सू
त्रानुशिष्टचतुर्थ्यर्थः। क्रियान्वितताद्र्थ्यार्थविवक्षायामेवापादानपंचमीप्रसक्त्या नमः पदार्थघटकापकर्षान्वि
तताद्र्थ्यार्थविवक्षायां शेषषष्ठ्येव प्रसज्यत इति सर्वसुपपदविभक्तयः षष्ठ्यपवादिका इति न विरुध्यते। वस्तुतस्तु
स्वावधिकोत्कर्षवत्तया ज्ञापनं नमस्कारः। तदेकदेशो ज्ञानान्वयि विषयत्वं विषयित्वं वा नमः स्वस्तीति सूत्रानुशिष्टच
तुर्थ्यर्थः। गुरुं प्रणमतीत्यादौ ताद्रूप्यज्ञानविषयतया गुरुः प्रकृतेः कर्मत्वेपि प्रकृते तेन रथधातुनुपस्थाप्यतयान भ
गवतः कर्मता। नारायणं नमस्कृत्येत्यादौ नारायणादेः कर्मत्वं प्रयत्नेनोपपादनीयं। नमस्करोति प्रणमतीत्यादौ स

यौत्वर्थ एव नमस्कारः नमः शब्दो हि तात्पर्यग्राहकः इत्याद्दे=

श्री.टी.गा.

२

समभिव्याहृतस्य कर्तुरेवत्वावधिकोत्कर्षबोधकव्यापारः प्रतीयते न तूच्चारयितुरेवाभक्तेतु केवलाभ्रमः पदात्मयो
त्कुरेव तादृश व्यापारः प्रतीयत इति मदवधिकोत्कर्षवत्त्वा भगवत स्तोतुरुक्तो मन्दीयो व्यापार इत्याकारकः प्रमा ना
द्बोधः। विष्णुमिति। विष्टंभोधृतिः। सा चापतनविरोधिसंयोगः। यथा विहायसि भ्राम्यतां विहंगमादीनां शरीरधा
रकप्रयत्नाधिष्ठानामपतनं तथा भूरादिलोकानां गुरुतराणामपि प्रयत्नवदीश्वरसंयोगादेव नवतिष्ठते निरुक्तधृतिकर्तृ
त्वं भगवतोऽव्याहतमेवापतनविरोधित्वं पतनानुत्पादप्रयोजकत्वं। एवं च धात्वर्थतावच्छेदकपतनानुत्पादवत्त्वा भगवता
नां कर्मता। सुखं व्यादायस्वपितीत्यत्रेव समानकालीनत्वमेव क्त्वाप्रत्ययार्थः। नतूत्तरकालीनत्वं भगवतो भूतधारक
त्वमुत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर इत्याद्युपनिषदोपि प्रमापयन्ति।
अखंडेति। अत्र नित्यसुखज्ञानवत इति नित्यसुखज्ञानात्मकायेति वा व्याख्यानं वेदांतिनामेव शोभते न तु नैयायि
कानां तैर्नित्यसुखस्यात्मनि ज्ञानसुखाभेदस्य चानभ्युपगमात्। अतस्तन्मतेऽखंडो दुःखासंभिन्न आनंदो यस्मात्तो
खंडानंदः। एवं भूतउपासनात्मको बोधो यस्येत्येव व्याख्येयं। अथवा ग्रंथकृता नित्यसुखाभिव्यक्तिर्मुक्तिरिति भट्टमत
स्य परिष्कृतत्वात्तदवलंब्यैवैतदभिहितं। तथा चाखंडस्य नित्यस्यानंदस्य बोधः साक्षात्कारो यस्मादिति व्युत्पत्त्या भगवत
उपासनाविषयतया मुक्तिप्रयोजकत्वमेवाखंडेत्यादिना प्रतिपादितं। तन्नाय। तन्निश्वरीयसुखस्यावदन्यत्वमि
भगवतो॥ तिकुसुमांजलिप्रकाशे गौरंघट्टव्याख्यानावसरे वर्धमानोपाध्यायैरभिहितं॥ परमेति। परमत्वमुत्कर्षः। स चात्मांतरावधि २
सर्वज्ञता तृप्तिरनादिबोधः स्वतंत्रता नित्यमलुप्तशक्तिः। अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्य।

कः सर्वविषयकनित्यज्ञानादिमत्त्वमेवेश्वरस्य। एवं चार्थत एव तस्यात्मत्वलाभेप्यात्मपदसमभिव्याहारेणैवोक्तोत्कर्ष
परतालाभ इति न तद्वैयर्थ्यं। वस्तुतस्तु आत्मपदं ज्ञानावच्छिन्नस्य वाचकं। न तु सुखादिसमवायीकारणतावच्छेदकी
भूतद्रव्यत्वव्याप्यजातिविशेषावच्छिन्नस्य। सुखादिसमवायिकारणतारहितस्येश्वरस्य तादृशजातिमत्त्वमानाभावा
त्। सुखत्वाद्यवच्छिन्नं प्रति आत्मत्वेन हेतुताया अनभ्युपगमेपि धर्मादिविरहेणात्मनि सुखाद्युत्पादनासंभवेन
तादृशजातावेव युक्तेर्दुर्लभत्वात्। एवं च यथा परमसुंदर इत्यादौ पदार्थतावच्छेदकसौंदर्यादिगतउत्कर्षः परमपदे
न प्रत्याय्यते तथात्राप्यात्मपदार्थतावच्छेदकज्ञाननिष्ठः सर्वविषयकत्वादिरूपउत्कर्षस्तत्पदेन बोध्यत इति॥ एवं च
भगवतउत्कर्षप्रतिपादकत्वेन स्तुतिरूपतयाऽयमपि श्लोको मंगलरूप इति ध्येयं॥ नन्वेकानंतरमपराभिधाने
संगतिसत्त्वमपेक्षितं न तु तत्प्रदर्शनं तथा च प्रत्यक्षोपजीवकत्वादित्यादिना कार्यतारूपसंगतिप्रदर्शनमफलं। न च
प्रत्यक्षानंतरमनुमानं निरूप्यत इत्यभिधानं तत्सर्वमेव किमेतन्न निरूपितमित्याकांक्षोदयान्निरूपणे पौर्वापर्यनि
यामकस्य प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावस्य प्रदर्शनमावश्यकमिति वाच्यं। निरूपणयोरुपजीव्योपजीव
कतावस्य निरूपणक्रमनियामकतायाः स्वयं दूषणीयतया स्वमते क्रमनियामकाकांक्षया तदभिधानासंगतेरित्या
शंकां परिजिहीर्षुः संगतिप्रदर्शनस्य प्रत्यक्षानुमानग्रंथैकवाक्यताप्रतिपत्तिप्रयोजनकत्वेन निरूपणप्रतिज्ञाया निष्फ
लत्वशंकां च निराचिकीर्षया तस्याः शिष्यावधानफलकत्वं च दर्शयति। सर्वेति। एकवाक्यत्वं साकांक्षत्वेन

मति भा भा:

शि॰दी॰ग॰ तैकार्थप्रतिपत्तिपरत्वं तथा च जैमिनिसूत्रं । अर्थैक्यादेकं वाक्यं साकांक्षं चेद्विभागे स्यादिति । एकार्थप्रतिपादक
योर्घटपटौ कलशोस्तीत्यादिवाक्ययोरेकवाक्यतावारणाय साकांक्षत्वनिवेशः । तदुत्थाप्याकांक्षानिर्वर्तकत्वत
२ निर्वर्तनीकांक्षोत्थापकत्वान्यतररूपवत्त्वमेव तत्साकांक्षत्वं । प्रकृते च प्रत्यक्षग्रंथोत्थाप्यायाः किमस्योपजीवकमित्या
रिकाया उपजीवकज्ञानविषयण्या आकांक्षाया विषयत्वादिसंपादनेन निर्वर्तकत्वमनुमानग्रंथस्येति निरुक्त
साकांक्षतानिर्वाहः । एतत्कंठं घटवद्भूतलं को घट इत्याकांक्षया प्रयुक्तस्य कंबुग्रीवादिमानित्युत्तरस्य तदेकवा
क्यतावारणायैक्यनिवेशः । प्रकृते च प्रत्यक्षपरिच्छेदानुमानपरिच्छेदयोर्मिलितावच्छिन्ने कार्यविषयका
त्वाजनकत्वेपि चत्वारि प्रमाणानीत्यप्रामाण्यशंकानारकं दितनिश्चयं प्रतिपरिच्छेदचतुष्टयस्यैव कथंचिदुप
योगितया तादृशप्रतिपत्तिप्रयोजकत्वाभिप्रायविषयत्वरूपमैक्यं निराबाधमेव । एतादृशैकवाक्यताघट
कसाकांक्षताज्ञानं संगतिज्ञानाद्भवति यद्यदर्थसंगतार्थकं स्ववृत्तित्वाकांक्षामिति व्याप्तेः । संगतिज्ञानस्य साकां सा॰५
क्षत्वानुमितिसामग्रीघटकत्वात् । प्रत्यक्षोपजीवकमित्यनभिधायोपजीवकत्वादिति पंचम्यंताभिधानं उपजीवक
त्वस्य संगतित्वलाभाय । प्रयोजकजिज्ञासाविषयत्वरूपस्य स्वजनकज्ञानविषयत्वरूपस्य परंपरया प्रयोजकत्वस्य
हेतुपंचम्यर्थतया प्रत्यक्षानंतरानुमानाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपानुमानसंगतित्वस
स्य लाभात् । वस्तुतो दर्शितपंचम्यर्थस्य जिज्ञासाघटितत्वात् साकांक्षतालाभायैव पंचम्यभिधानं । अत एव संगतित्वे ३

न संगतेरेकवाक्यताव्याप्यत्वे उपजीवकत्वत्वरूपतद्वांतररूपेणापि तद्व्याप्यतायां आवश्यकत्वात् संगतित्वज्ञानं वि
नाप्येकवाक्यताप्रतिपत्तिसंभवात् संगतित्वलाभाय पंचम्यंताभिधानमनर्थकमित्यपि निरस्तं । न च पंचम्यर्थान्व
यवक्त्रा प्रत्यक्षोपजीवकत्वज्ञानजन्यजिज्ञासाया अनुमानाभिधानप्रयोजकतालाभेपि जिज्ञासायां प्रत्यक्षग्रंथो
त्थाप्यत्वस्यानुमानग्रंथनिर्वर्तनीयत्वस्य चालाभान्निरुक्तसाकांक्षत्वलाभेन संभवत्येवेति वाच्यं । जिज्ञासायां प्रत्य
क्षोपजीवकत्वज्ञानजन्यत्वलाभे तादृशजिज्ञासाप्रयोजकीभूतप्रत्यक्षग्रंथप्रयोज्यत्वस्य अनुमानाभिधानप्रयोजक
त्वलाभे अनुमानप्रतिपादकग्रंथस्य निर्वर्तनीयत्वस्य चार्थतो लाभात् । अनुमानग्रंथे प्रत्यक्षग्रंथे एकवाक्यताप्रति
पत्तिश्च उभयोरेकग्रंथांतर्गतत्वज्ञानसंपादनेन समस्तचिंतामणिग्रंथज्ञानाधीनप्रत्यक्षादिचतुष्टयधर्मिकप्र
माणत्वरूपदपरिच्छेदरूपफलविशेषेच्छावतोऽधीतप्रत्यक्षपरिच्छेदस्य शिष्यस्य तादृशफलोपयोग्यनुमानपरि
च्छेदाध्ययनप्रवृत्तावुपयुज्यते । केचित्तु एकवाक्यत्वं निःश्रेयसरूपैकफलप्रयोजकत्वं तत्सत्त्वे चानुमानग्रंथे प्र
ज्ञानधर्मिकमुक्तिरूपेष्टसाधनताज्ञानरूपा शिष्यप्रवृत्तावुपयुज्यते अत एव च सा संगतिमस्त्यर्थप्रतिपादकत्वरू
पहेतुमत्ताज्ञानजनकात् संगतिप्रदर्शनादिति व्याकुर्वंति । तदसत् । उक्तहेतोरेतादृशैकवाक्यतासत्त्वेपि निःश्रेयसा
नुपयोगिग्रंथस्यासाधारण्यात् तथा व्यभिचरितत्वात् । निःश्रेयसत्वं परित्यज्य फलत्वरूपेण फलस्य प्रवेशे फलस्या
त्कटेच्छाप्रयोजकरूपविशेषाज्ञानात्सिद्धेश्चावच्छेदकस्यानुपयोगितापत्तेः । एकफलकत्वस्य एकवाक्यतापदार्थता
(संगतिविशेषजं दर्थके बोधः शास्त्रादि)

आमानाममावेनप्रतिरोधः)

शि॰ टी॰ ग्र॰ विरहत्वं ॥ शिष्याणामिति । अवधानं । अनुमाननिरूपणात्मकस्यतत्र्यव्याप्तिविशिष्टेत्यादिप्रकृतशब्दस्यविशि

ष्यशुश्रूषा । अनुमाननिरूपणत्वेनसामान्यतस्तादृशविशिष्टप्रमाणत्वप्रतिपादकशब्दविषयत्वावगता प्रमा॰ उ॰ शानु षुष

४ वपिविशिष्यतच्छ्रवणेवुभुत्सितार्थप्रतिपादकत्वाग्रहादिशिष्यतच्छुश्रूषानसंभवति । अनुमानमिदानींनिरूप्य

तइतिप्रतिज्ञायतदभिधानेचविशिष्यप्रकृतनिरूपणेऽनुमानविषयकत्वग्रहेणवुभुत्सितप्रमाणत्व

प्रतिपादकतासहकृतशब्दश्रवणेविशिष्यगतस्तमइतिलाहशुश्रूषारूपावधानेनिर्वहतीतितत्फलकत्वं अवधानं

प्रतिज्ञायाः । नाद्यावधानंचविशिष्यतच्छ्रवणेशिष्यप्रवृत्तावुपयुज्यतेविरोधिन्याभ्यादुपादिसामग्र्याधि

अवधानंकत्वम्॥ घटनेनशब्दश्रवणएवंवा । नचसंगतिप्रदर्शनानुमाननिरूपणप्रतिज्ञयोः प्रसक्तमुक्तप्रयोजनत्वा

म्नोते न्वयेचकारःसंगतिरितिवाच्यं । प्रत्यक्षोपजीवकत्वादित्यादिसमुदितवाक्यस्यैवप्रतिजानीतेइतिप्रति

तत्त्व इत्यर्थः त्वस्य ज्ञापकेनविवक्षितत्वात् । अन्वयाभावत्वादित्यादीतिक्रियाविशेषणान्वयाभावादेकपदार्थेएवतदुत्पन्नान्व

प्रतिज्ञाभावे येनतत्संगतेः । एकदेशस्यएकवाक्यताप्रतिपत्त्यादिफलकत्वेनापिसमुदायेतत्फलकत्वाबाधात्संगति प्रत्यक्षोपजीवकत्वा

त्वा त्विज्ञांशप्रतिपादनद्वारानैकवाक्यताप्रतिपादकत्वमुक्तप्रतिज्ञावाक्यस्यकिंतुसंगत्यंशप्रतिपादनद्वा दि

रेणितस्यसंगतिप्रदर्शनरूपताप्रतिपत्तयेसंगतिंप्रदर्शयन्नित्यभिहितं । धातुसंबंधेप्रत्ययाइत्यनेनसम

भिव्याहृतक्रियासमानकालीनतायांमनुशिष्टशतृप्रत्ययात्संगतिप्रदर्शनप्रतिज्ञयोरेककालीनत्वलाभेना ४

प्रत्यक्षोपजीवकत्वादित्यादेर्नेकत्वेत्यादिग्रन्थाभिन्नेप्रतिजानीतेइत्येकस्यपदस्यार्थेएकवाक्यताप्रतिपत्तिशिष्यावधा

नद्वाराऽन्वयेनचकारःसंगतेः) ५

[illegible]

र्थतत्तद्भेदप्रतीतेः ॥ प्रतिजानीतइति । अव्यवहितोत्तरकालकर्तव्यतयाबोधयतीत्यर्थः । लट्प्रत्ययस्यात्रवर्त्त

मानसामीप्यार्थकत्वादितिभावः । प्रत्यक्षोपजीवकत्वादितिपंचम्याज्ञापकत्वरूपहेतुत्वपरतामिमानेननिरूपणक्र

मनियामकाकांक्षयाऽपजीव्योपजीवकभावप्रदर्शनमितिसाप्रदायिकावर्णयंति ॥ तन्मतमेवप्रथमतोनुवर्त्त

मानः फलीभूतप्रत्यक्षानुमितिप्रमयोः प्रत्यक्षानुमानप्रमाणयोश्चकार्यकारणभावस्यप्रमातत्करणनिरू

पणक्रमनियामकतामाह अत्रेति ॥ प्रत्यक्षानुमानग्रंथयोर्वापर्येत्यर्थः ॥ नियामकइतिशेषः । नियामकत्वमेवाह

तन्पर्युः । फलतःफलयोः प्रत्यक्षप्रमानुमितिप्रमयोरितियावत् । स्वरूपतः । स्वरूपयोः । प्रत्यक्षप्रमाणानुमानप्र

माणयोरितियावत् । अत्रानयोः प्रत्यक्षानुमानयोरित्यर्थः । फलतः । फलघटितपरंपरासंबंधेनस्वरूपतः ।

साक्षात्संबंधेनवर्त्तनइतिशेषः । तथाचउभयथैवसनिरूपणक्रमनियामकत्वमितिसावइतिकेचित् । अत्रेति ।

इदंपदंप्रत्यक्षोपजीवकत्वादित्यादिग्रंथपरं । सप्तम्यर्थः । प्रतिपाद्यत्वंतथाचफलयोः प्रमाणयोश्चोपजीव्यो

पजीवकभावः क्रमनियामकतयाएतद्ग्रंथप्रतिपाद्यइत्यर्थः । उपजीव्यत्वस्यशब्दतःसाक्षात्फलाभिधानेउपजी

वकत्वनिरूपकत्वेनार्थतस्तल्लाभात्प्रविरोधइत्यपरे । ननुप्रत्यक्षानुमित्योरुपजीव्योपजीवकभावस्यतन्निरू

पणपौर्वापर्यनियामकतानेदवसंभवतियतउपजीवकचमानंतर्याभिधानव्याप्यंसवेन । व्याप्तिश्चयत्प्रत्यक्षो

पजीवकंभवतितत्प्रत्यक्षनिरूपणाव्यवहितोत्तरनिरूपणविषयइतिविशेषतः । यद्यदुपजीवकंभवतितत्तन्नि

[illegible]

प्रत्यक्षगते

शि॰टी॰प्र॰ रूपण। व्यवहितोत्तरनिरूपणविषय इति सामान्यतो वाच्यात्। उभयत्र प्रत्यक्षानंतरमनिरूपितेतदुपजीवकेष्वदार्यं २६
तरे व्यभिचारः तदव्यवहितनिरूपणविषयत्वे सतीति विशेषणं हेतौ निवेश्यता दृष्टव्यभिचारवारणपि प्रथम दृष्टांता
५८ भावः व्यतिरेक दृष्टांतः सुलभ इति चेत् तदानुमानत्वमेव प्रत्यक्षनिरूपणानंतरनिरूपणनियामकं किं नोच्यते अत्र यो
जकत्वशंकापुनस्तुल्यैवेति द्वितीय एव पक्ष आदरणीयः। तत्रापि अनुमित्युपजीवकत्वस्तु व्यवसायत्वात्मकोपन
यादिजन्योपनीतप्रत्यक्षादरूपनिरूपणाव्यवहितोत्तरमनिरूपणेन व्यभिचारो दुर्वार इति शंकां निराचिकीर्षुः प्रत्यक्ष
प्रमानिष्ठानुमित्युपजीवकतातोनुमितिनिष्ठप्रत्यक्षोपजीवकतायां आनंतर्याभिधानव्याप्यतावच्छेदकविशेषमाह।
प्रत्यक्षफलस्येति। तथा। साक्षात्परंपरया वा अनुमित्युपजीविका। यादृशानुमितिकारणज्ञानमनुमित्यादिरूपमेव तत्र
साक्षात्प्रत्यक्षोपजीवकत्वासंभवात्। परंपरया वेति। तथा चोपजीवकत्वं जन्यजन्यादिव्याप्तं तत्कार्यत्वरूपं न विवक्षि
तं अपितु तत्साधारणप्रयोज्यत्वरूपमेवेति न दोषः। अयं। निरूपणविषयतावच्छेदकप्रमाविभाजकधर्मावच्छिन्नत्वरू
पतुपजीवकतानिष्ठउत्कर्षः पुरस्कृतः। आनंतर्याभिधानप्रयोजकतावच्छेदकतया आदृत इत्यर्थः। तथैन चकारेणाविभ
भाजकावांतरधर्मावच्छिन्नत्वस्य पुरस्कृतत्वं व्यवच्छिन्नं तथा च प्रत्यक्षत्वावच्छेदेन प्रत्यक्षेनानुमित्युपजीवकत्वमस्तीति
प्रत्यक्षं प्रागेव निरूपितं तथाविधानुमितित्वावच्छेदेन चानुमितौ प्रत्यक्षोपजीवकत्वमस्तीति सा पश्चान्निरूपितेति भावः।
प्रत्यक्षेपि निरूप्यतावच्छेदकफलविभाजकधर्मावच्छेदेनादृष्टद्वारानुमितिप्रयोज्यत्वमस्तीत्याशंकते। यद्यपीति। अदृष्ट ५८

जननी। स्वजनकादृष्टप्रयोजिकां सम्यक्यः पदसंकेतः भक्तर्तव्यतास्वकृतिसाध्यतावतत्परिच्छेदिकां तद्विषयिणीं शब्दाधीना
यामदृष्टजनकयागादिगोचरप्रवृत्तौ पिपत्तिपरवाक्याधीनकार्यबोधोपेक्षितः। तत्र च इदं पदमत्रार्थे शक्तं शक्तिप्र
माजन्यलक्षणाग्रहाजन्यएतद्विषयकशाब्दबोधजनकत्वादित्यनुमानाधीनशक्तिग्रहोपेक्षितः। अन्यत्र च इदं मत्कर्तव्यं
मत्कृतिं विनानुत्पद्यमानत्वे सति मदिष्टसाधनत्वादित्याद्यनुमानाधीनकृतिसाध्यताधीरपेक्षितेति प्रवृत्तिद्वारा अदृष्टप्र
योजिका अनुमितिर्जन्यमात्रं प्रत्येक प्रयोजिका अदृष्टस्य कार्यमात्रं प्रति हेतुत्वादिति भावः। नन्वेवमपि प्रमाविभाजकप्र
त्यक्षत्वाश्रयस्य नगत्कस्य हृत्स्यन्नित्यतयानुमित्यनुपजीवकत्वाभ्नेनिरूप्यतावच्छेदकधर्मावच्छेदेन प्रत्यक्षेनुमित्युपजी
वकत्वसंभव इत्यत आह। ईश्वरेति। नफलमिति। तथा च तत्साधारणप्रत्यक्षत्वं न फलविभाजकमतिप्रसक्तत्वात्। अपितु तद् अनुमितिजनक।
घाटत्तजन्यप्रत्यक्षत्वमेव तदेव च निरूप्यतावच्छेदकं तदवच्छेदेन चादृष्टद्वारानुमित्युपजीवकत्वमक्षतमेवेति भावः। प्रत्यक्षस्य प्रत्यक्ष
केचित्तु अयं कार्यतावच्छेदकप्रमाविभाजकधर्मावच्छिन्नत्वरूपोपजीवकतानिष्ठउत्कर्षः पुरस्कृतः। आनंतर्याभिधान साधारणत्वात्
प्रयोजकतया आदृत इत्यर्थः। ननु नित्यानित्यसाधारणधर्मस्य कार्यतानवच्छेदकत्वात् जन्यप्रत्यक्षत्वमेव कार्यतावच्छेदकं।
तथा च प्रत्यक्षेपि कार्यतावच्छेदकीभूतप्रमाविभाजकधर्मावच्छेदेनादृष्टद्वारानुमित्युपजीवकत्वमस्तीत्याशंकते। यद्यपीति।
ननु नित्यानित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वेपि विरहात् प्रत्यक्षत्वे समेवता दृशोधर्मस्तथा च कथमुक्तधर्मावच्छेदे
नानुमित्युपजीवकत्वसंभव इत्यत आह। ईश्वरेति। नफलं ... ननादृशप्रत्यक्षसाधारणप्रत्यक्षत्वं जन्यतावच्छेदकं।

नित्यानित्यसाधारणरूपतया तेऽपसिद्धांतप्रसंगात्। तथा च जन्यप्रत्यक्षत्वमेव कार्यतावच्छेदकं तदवच्छेदेनादृष्टद्वा
राऽनुमित्युपजीवकत्वं संभवतीति भावः। आहुः। दृष्टद्वारकं दृष्टमात्रद्वारकं। अदृष्टाद्वारकमिति यावत्। तेन
दृष्टस्य यागादेरनुमितिद्वारत्वेपि न क्षतिः। अदृष्टाद्वारकत्वं च स्वजनकादृष्टाजनकनिरूपितत्वं स्वं चेह अनुमत्त्वया *कार्या अनुमिति*
अभिमतो। तथा च उपजीवकत्वं च आनंतर्याभिधाने आदरणीयं नियामकं तया स्वीकरणीयं। तथा च यत्
स्वजनकादृष्टाजनकप्रभिन्नरूपितप्रमितिविभाजकसदव्यवहितनिरूपणविषयतावच्छेदकधर्मावच्छिन्नो
पजीवकतावत्। तत्त्वं निरूपणाव्यवहितोत्तरनिरूपणविषयत्वं इत्येव व्याप्तिरादरणीया तत्र च न व्यभिचारावका
शः इति भावः। नन्वदृष्टद्वारकोपजीवकताया आनंतर्याभिधाननियामकत्वमंगीकृत्य प्रत्यक्षमेव किं [illegible]
पश्चान्न निरूपितेत्यत आह। द्वारस्येति। अदृष्टद्वारकोपजीवकत्वस्येत्यर्थः। अविनिगम्यत्वात् विनिग
मनाया अविषयत्वात्। तथा चादृष्टद्वारा प्रवृत्त्यौपयिकोपादानप्रत्यक्षोपजीवकताया अनुमितौ सत्वेनादृ
ष्टद्वारकोपजीवकत्वस्य तुल्यतया आनंतर्याभिधाननियामकत्वं न संभवतीति भावः। प्रत्यक्षप्रमाणस्य चक्षु
रादेरप्यदृष्टद्वारा समवायादिपरिच्छेदिकानुमानोपजीवकत्वात् स्वरूपनिष्ठोपजीवकतायाः कथमानंतर्याभिधा
ननियामकत्वमित्याशंकां परिजिहीर्षुरनुमाननिष्ठोपजीवकताया विशेषं दर्शयति। सर्वमिति। यत्प्रमाणप्रा
माण्यग्रहार्थं प्रमाणांतरमपेक्षितं तदर्पितदुपजीवकमुच्यते प्रकृते च तादृशोपजीवकत्वमविवक्षितं नित्येना

पींद्रियेण प्रामाण्यग्रहार्थमनुमानापेक्षणादिति विचाह्यतेतौ तदुपेक्षितत्वरूपमनुपजीवकत्वमेवेति स्फुटीकर्तुं इंद्रियोपजी
वकमित्यनभिधाय इंद्रियापेक्षोत्पत्तिकमित्यभिहितं एतावता एतदेव परीक्षाकृताग्रंकोत्तरसावेन यदभिहितं ततः स्वा
सिद्धानुसौष्ठवमादर्शितं। एवं च निरूपणीयतावच्छेदकानुमितिकरणत्वादिरूपप्रमाणविभाजकरूपावच्छेदेनोपजी
वकत्वमेवानंतर्याभिधाननियामकं यो व्याप्तियाशयः। नन्वनुमितिं प्रति भगवत्ज्ञानस्य उपादानप्रत्यक्षत्वेन व्याप्तिज्ञा
नत्वेन च कारणत्वात्तदप्यनुमितिकरणं। अथ च नित्यतया न प्रत्यक्षोपजीवकमिति कथमनुमितिकरणत्वावच्छेदेन
प्रत्यक्षोपजीवकत्वेत्याशंक्य तस्यानुमित्यसाधारणकरणत्वाभावं व्यवस्थापयति। अनुमितिमिति। भावयतोपि। उपा
दानप्रत्यक्षविधया जनयतोपि। तत्करणतेति। अनुमितित्वावच्छिन्ननिरूपितकरणतानिर्वाहकतत्समवायिसमवेत
तरूपप्रत्यासत्तिविरहेणेत्यर्थः। अतत्वात्। अनुमितित्वावच्छिन्नाकरणत्वात्। अयमभिप्रायः प्रत्यक्षानुमानोपमानश
ब्दाः प्रमाणानीत्यत्र आत्मशरीरादिव्यावृत्तं नित्यसाधारणकरणत्वमेव प्रमाणपदेन विवक्षितं तत्र प्रमितित्वविभाज
कधर्मावच्छिन्नकरणत्वं एवं चानुमानपदेनापि अनुमितित्वावच्छिन्नकरणत्वमेव विवक्षितं तदेव विभाजकं। ईश्वरज्ञा *यादृशम्*
नं च न तथा। तथा हि कुठारादेरिव योगव्यवच्छिन्नव्यापारवत्कारणत्वं करणत्वं न तु कारणत्वमात्रं तथा सति छिदानुपधायक
कुठारादिव्यक्तेरपि तत्करणताप्रसंगेन तत्कुठारेण छिनत्तीत्यादिप्रयोगापत्तेः। तस्य च तन्निरूपितकार्यतावच्छेद
कसंबंधेन कार्याधिकरणे तत्कार्योपधायकव्यापाराव्यवहितप्राक्क्षणावच्छेदेन स्वावच्छेदकसंबंधेन वर्त्तितमत्वमिति

७२१०११७२

शि॰ टी॰ रा॰

विशिष्टकारणत्वंस्वंकारणताईश्वरज्ञानस्यचोपादानप्रत्यक्षविधयाकारणतातदवच्छेदकविषयतासंबंधेनतस्यानुमि
तिसमवायिनिहेतुत्वावधिपितस्याजन्यतावच्छिन्ननिरूपितायाअनुमितित्वावच्छिन्ननिरूपितत्वात् ।अनुमितित्वावच्छिन्न
१ निरूपिताचयाव्याप्ति[illegible]ज्ञानत्वावच्छिन्नकरणतातदवच्छेदकसमवायसंबंधेनतस्यानुमितिसमवायिन्यसत्त्वा
द्यात्मप्रवृत्तेर्नानुमितित्वावच्छिन्नकरणत्वमितितिथा चनादृष्टकारणतावच्छेदेनप्रत्यक्षप्रमाणोपजीवकत्वमस्तु
मेवेति एवंजन्यज्ञानत्वावच्छिन्नकरणस्य मनःप्रभृतेः प्रत्यक्षानुपजीवकत्वेपिनक्षतिः । उक्तरीत्यातस्याप्यनुमिति
त्वावच्छिन्नाकरणत्वात् । केचित्तुप्रमाणतावच्छेदकरूपावच्छिन्नोपजीवकत्वस्यानंतर्याभिधानप्रयोजकत्वाभिमानेन
ईश्वरज्ञानस्यकार्याधिकरणासत्त्वासत्त्वस्यापिअनुमितिकरणतावच्छेदकव्याप्तिज्ञानत्वव्याप्तिरतकोपजीवक
त्वस्यानंतराभिधाननियामकत्वानुपपत्तिरितिपूर्वपक्षयित्वानियस्यपरस्वरूपयोग्यस्यफलावश्यंसावच्छिन्नियमानु
रोधाज्जन्यव्याप्तिज्ञानत्वमेवानुमितिकरणतावच्छेदकं अनन्तत्वादिरस्य चकरणतावच्छेदकरूपवत्त्वाभावादित्यूचुः ।
प्रत्यासत्तिघटितफलोपधायकतायानित्यत्वविशिष्टताद्रूपव्यापकतयालक्षावस्यताद्रूपरूपासावहेतुतेति
परिष्कुर्वंति तेमादर्थानि । तदसत् । उक्तरीत्यैवसामंजस्यात् । सर्वेपुनरिति । तथाचप्रत्यक्षत्वावच्छिन्नकरणत्वावच्छेदेनानुमानोप
जीवकत्वमितिनानुमानानंतरंप्रत्यक्षनिरूपणापत्तिरितिभावः । नानुमानोपजीवकमितिपरित्यज्यनानुमानापीन
जनकत्वाभिधानेबीजेरवोपदर्शितमेव । अनुमितिस्वरूपयोग्यमात्रस्यैवतत्करणत्वमस्तुपत्याहदृष्टाद्वारकोपजीवक १

तस्यानंतर्याभिधाननियामकतामंगीकरोतिदृष्टद्वारवेति । तथाचपरमेश्वरज्ञानस्यानुमितिकरणत्वेपिनक्षतिः । नि
रूप्यतावच्छेदकसामानाधिकरण्येनादृष्टाद्वारकोपजीवकतायाएवानंतर्याभिधाननियामकत्वोपगमात् यावदनुमि
तिकरणेषुप्रत्यक्षोपजीवकताविरहविष्कलिविरहात् । नचोत्पत्तिमद्पीति । यद्यपिचक्षुर्घर्षणप्रसृष्टोपयिकमनुमानंरवं
उचक्षुष्यदृष्टमदृष्टीकृत्सैवमहाचक्षुर्गोलकतदवयवविभागानुकूलावयवक्रियाजनकघर्षणसंपादनेनप्रयोजकंस
कलितयापीदानींजन्यत्वरूपस्यउपजीवकत्वस्यैवादरणीयतयारवंडचक्षुषश्चानुमानजनिष्ठान्यथासिद्धिनिरूपकत्वेन
तज्जन्यताविरहाभ्रातिप्रसंगः एवंचादृष्टद्वारकमवर्त्तकानुमानस्यान्यथासिद्धतयाचक्षुराद्यहेतुत्वेपिपरमेश्वरीय
व्याप्तिज्ञानरूपानुमानानिरूपितचक्षुरादिनिष्ठजन्यतावारणायेयस्यजनकादृष्टाजनकनिरूपितत्वात्मकमदृष्टा
द्वारकत्वमुपजीवकताविशेषणमनुपात्तमितिध्येयं ॥ अथवायुररूपवान्स्पर्शवत्त्वात्मित्यादिग्रंथस्यवंध्यारव्येयः । अर्थंनिरूप्य
तावच्छेदकावच्छिन्नस्वरूपउक्तरूपः पुरस्कृतः फलस्वरूपस्वरूपस्यानंतर्याभिधानप्रयोजकतावच्छेदकतयाआहतत्रयां या
रवंचप्रमितिविभाजकधर्मावच्छिन्नतस्यविशिष्यानिवेशाद्दृष्टांतसोलभ्यमपिबोध्यंनिरूप्यतावच्छेदकंचसर्वत्र
विभाजकरूपसमन्वयेनरूपेणविभागस्तद्रूपावच्छिन्नस्यैवलक्षणादेराकांक्षितत्वात् । यत्रयत्रीत्यादिकंपूर्ववत् । न
नुफलस्यानुमितेर्निरूप्यतावच्छेदकानुमितित्वावच्छेदेनप्रत्यक्षफलोपजीवकत्वेपिस्वरूपेअनुमितिकरणेताद्दृशप्र
त्यक्षप्रमाणोपजीवकत्वमसिद्धंईश्वरज्ञानस्यापिव्याप्तिज्ञानत्वेनानुमितिकरणत्वात्तस्यचनित्यतयाऽनुपजीवक

ताह। अतः प्रमाणस्यानंतराभिधाने प्रमाणविभाजकधर्मसमानाधिकरणत्वमुपजीवकत्वमेव नियामकं वाच्यं तच्च न सं
भवति चक्षुरादौ दीपदानादिगोचरमहत्त्वोपयिकानुमानोपजीवकताया अदृष्टाद्वारकत्वविशेषणेन व्यावृत्तत्वादपि
च चक्षुरादिनिष्ठा या चक्षुर्घर्षणादिमहत्त्वोपयिकानुमाननिरूपितमहत्त्वा चक्षुर्नाशादिद्वारकोपजीवकताया अ
दृष्टाद्वारकतया निरुक्तोपजीवकताया अनंतराभिधानव्यभिचारित्वादित्याशंकां अनुमितिं प्रतीश्वरज्ञानस्य
करणत्वनिराकरणेनानुमितिकरणतावच्छिन्नप्रत्यक्षप्रमाणोपजीवकतां व्यवस्थापयन्निराकुरुते सर्वक्रिया
दिना अनुमितिक्रियाहेतुः इत्येव प्रदर्शित एवार्थः तथा च निरुक्तप्रत्यक्षत्वावच्छेदकरूपावच्छिन्नोपजीवकत्वमेव सर्वत्रानं
तराभिधानप्रयोजकमिति भावः। तादृशोपजीवकत्वस्य प्रत्यक्षासत्त्वे दर्शयन्नाशंकितव्यभिचारविरहं स्पष्टयति। सर्वं प्र॰प्र॰प्रमा॰।
पुनरिंद्रियमिति मनःश्रवणयोरजन्यत्वात् इति तथा च प्रत्यक्षप्रमितिकरणत्वावच्छेदेन अविशेषितमुपजीवकत्व
मेव नास्ति सुतरामेवादृष्टाद्वारकत्वविशेषितं तत्त्वात् तादृशस्य जन्योपींद्रियं क्वचिदेव सत्त्वादिति भावः। यदि परमन्य
त्वज्ञानस्यापि स्वरूपयोग्यतामात्रेण करणत्वमुपेयते तदा स्वरूपेणावच्छेदकावच्छेदेनोपजीवकत्वमसिद्धमि ४
भा॰भा॰ ति जन्यत्वात्यागेनैवोपजीवकत्वमनंतराभिधानविषयत्वनियामकं वाच्यं तच्चानुमाननिरूपितमदृष्टद्वारा प्रत्यक्षेऽनु
मितिव्यभिचारमाशंक्य आह। अदृष्टद्वारेति स्वरूपनिष्ठमदृष्टाद्वारकं प्रयोज्यव्यावर्त्तकं कार्यत्वरूपमुपजीवक भा॰।
त्वमेवादरणीयमित्यर्थः चक्षुर्घर्षणादिमहत्त्वोपयिकानुमानस्य चान्यथासिद्धतया चक्षुरादिषु न तत्कार्यत्वमिति भावः।

यत्र प्रत्यक्षकार्यनिरूपणानंतरं कारणं निरूप्यते न तु कार्यं निरूप्य कारणं निरूपितं उपजीवकतानिरूढ दाविशिष्टे

एतावता उपजीवकत्वस्यानंतर्याभिधाननियामकता पर्यंकिंचित्परिष्कृत्य तं परित्यज्य कामोदर्शितसामान्यनि
यमे व्यभिचारमाशंकते अथेति उपजीवकमुपजीव्यनिरूपणानंतरं निरूपणविषय एवेति नियमो नेत्यर्थः।
कार्यं निरूप्यापीति कारणनिरूपणात्प्रागेव कार्यनिरूपणादित्यर्थः। यथा अत्रैव ग्रंथे अनुमानात्प्रागेवानु
मितिर्निरूपितेति भावः। व्यभिचारस्थले तत्तदुपजीवकतात्मेदात्मकविशेषणांतरप्रक्षेपेण वारणसंभवेपि
अप्रयोजकत्वं दुर्वारमेव अनुमानत्वमेवानुमितेरिव बाधकाभावेन प्रत्यक्षात्प्रागेवानुमानस्य निरूपणसंभ
वात्तावतापि निरूपणीययोस्तयोरुपजीव्योपजीवकभावव्याघातादिति हृदयं ज्ञापकत्वरूपहेतुतायाः प्रत्य
क्षोपजीवकत्वादिति पंचम्यर्थतोपगमे प्रदर्शितनियमाभावेपि क्वचित्तेरवज्ञानजन्यजिज्ञासाप्रयोजकत्व प्र॰द्र॰इ॰भा॰रि॰
रूपे हेतुत्वे च नियमाभावेप्यविरुद्धमेवेत्याशयेन समाधत्ते किं चात इति अतो दर्शितनियमाभावात् किमनिष्टं न ८४
किंचिदपीत्यर्थः। नन्वेवमुपजीवकत्वस्य संगतित्वानुपपत्तिः सामान्यतोनंतराभिधानव्याप्यस्यैव संगतित्वा
दित्यत आह। नहीति संगतित्वं अनंतराभिधाननिरूपितदर्शितप्रकारसामान्यव्याप्तिनिर्वाहं यतो नेत्यर्थः। अत्रत्य
देवकुलस्य साकांक्षायां यं पदुपजीवतं तन्निरूपणानंतरं निरूपणविषय इति व्याप्तिविरहेपि उपजीवकतया संगति
त्वमभिधास्यमानत्वस्य संगतित्वाभावस्वीकारनिराकरणाय तत्साधारणसंगतिलक्षणमाह। आनंतर्येति।
हि हेतो अनंतरमेव आनंतर्यं चानुपपत्त्यादिलोत्तरार्थेषु प्रमाणनिरूपणाव्यवहितोत्तरनिरूपणप्रयोजिकाया

४ सहितत्वप्रुक्ता

जिज्ञासात्वजनकज्ञानविषयीभूतो यो धर्मः सतन्निरूपितसंगतित्वमित्यर्थः उपजीवकत्वादावेतल्लक्षणसंक्रम
नमस्कारो न्यायेऽत्राग्रे दर्शयिष्यते। यथा स्यात्किमुपजीवकमित्यादिजिज्ञासोपजीवकत्वज्ञानहेतुत्वस्या
घटादिजिज्ञासायां घटत्वादिधीत्वस्येति तद्विषयघटत्वादेः प्रत्यक्षादिसंगतित्ववारणाय प्रयोजकान्तं अयमत्र
प्रत्यक्षादौ निरूपिते सत्यामयी वक्ता कोऽघट इति कस्यचित् जिज्ञासायां केनचित् घटो निरूपित इत्याह आनि
रूपणप्रयोजकतया विधजिज्ञासामादाय घटत्वादावपि प्रत्यक्षादिसंगतित्वप्रसंगः प्रयोजकान्तमुपादाया ५८
पि नशक्यते वारयितुं यदि चैवं सति घटत्वादेः संगतित्वमिष्टमेव प्रसंगमध्येतस्यां तत्सविनीयत्वा न संग
तेः षोढात्वव्याघातः अन्यथा तत्रैव संगत्यंतरापत्त्या हेतुत्वान्निरूपणस्यासंबद्धप्रलपतापत्तेः प्रत्याकांक्षिता
भिधानं तथेत्युच्यते तत्प्रयोजकांतमनर्थकमिति चेत् यन्निरूपणानंतरं कदाचिदपि कस्यचित् यद्धर्मावा
नरधर्मप्रकारकज्ञाने ज्ञानजायते अपितु कालांतरे जायतेत तत्स्यतत्संगतित्ववारणायैव प्रयोजकां
तोपादानात्। न च काळस्यानवधिकत्वात् पुंसां चासंख्यत्वात् तादृशधर्म एव दुर्लभ इति वाच्यं तादृशधर्मसंभाव
नयाजातिव्याप्तिसंदेहेन तत्प्रकारकविशेषणदानौचित्यात्। वस्तुतस्तु जिज्ञासुमेकं पुरुषं प्रति संगतमपि अता
दृशमन्यं प्रत्यसंगतमिति यं प्रतिपादयितुमानंतर्याभिधानं तादृशाभिधानप्रयोजकतत्कुरूपीयजिज्ञासा
जनकज्ञानविषयो धर्मस्तं प्रति संगतिरिति पुरुषविशेषनियंत्रितमेव संगतित्वं निर्वाच्यं तथा चयन्निरूपणानंतरं यद

पुरुषस्य प्रसापयत्वे:

प्रयत्कार्यविरेहेर्भिद

५८

उपजीव्यज्ञानत्व

पुरुः

प्रतिपादयद्धस्यापेक्ष्यस्य

मंविदि भ्रस्यविशेषजिज्ञासायस्य पुंसोनजाता अपितस्याभिधानानंतरमेव तद्धर्मस्य तं प्रति संगतित्ववारणाय तत
दुपादानमावश्यकं आनंतर्याभिधानप्रयोजकज्ञानविषयत्वनिवेशने पटादिकं निरूप्य प्रतिपाद्यस्य जिज्ञासानंतर
मेवपटासंबंधघटाद्यभिधानं के नचित् कृतं तत्र तस्य घटज्ञानं सम्पत्तित्याद्याकारकं जनकीभूतत्वस्य घटादिज्ञान
विषयघटत्वादावतिप्रसंगः तादृशज्ञानस्यापि पटादिबुबोधयिषाद्वारा पटाद्यभिधानानंतरघटाद्यभिधानप्रयो
जकत्वात् अतः प्रयोजकजिज्ञासाजनकेति परकीयकीतनगोचरेच्छाजन जिज्ञासात्वात्तु मिच्छाजिज्ञासेति बुभुत्सा
स्वीयकीर्तनगोचरेच्छायाएव तथा त्वात् जिज्ञासायाआनंतर्याभिधानप्रयोजकत्वं च प्रयोगस्य काभिधानानुकू
लत्वं च बुबोधयिषानुकूलत्वं प्रतिपाद्यज्ञानस्यासिद्धत्वं ज्ञानं च तत्पादकीभूतस्यासिद्धत्वव्याप्येच्छाविषयत्वं प्रति
पादकस्य किं मत्यस्योपजीवकमित्यादिप्रश्न वाक्यस्य व्यवहर्तव्यज्ञानविधयानिर्वाहकं यज्जिज्ञासात्वसंविषय
विषयानर्हत्वानुकूल्येन न च जिज्ञासाजनकत्वोपादानेपि दुरुक्तलेकथंचित्त्वस्तु घटादिज्ञानानुकूल्यघटादिजिज्ञा
साजनकज्ञानविषये तिप्रसंगो दुर्वार एवेति वाच्यं प्रतिपाद्यपुरुषीयजिज्ञासायाः एव लक्षणघटकत्वात्। अथैवम
पिअनुमानानंतरोपमानादिनिरूपणे यथा उपमानादिजिज्ञासायाः प्रयोजकत्वं तथा तादृशजिज्ञासानुकूलानु
मानादिज्ञानसंपादनेनानुमानादिजिज्ञासायाअपि प्रतितजनकज्ञानविषयानुमानादिनिष्ठप्रत्यक्षोपजीवकत्वा
देरप्यनुमानादिनिरूपितसंगतित्वापत्तिरिति जिज्ञासाजनकसुखादिरूपफले छाविषयं प्रतिव्याप्तिवारणाय
चेन्न जिज्ञासात्वद्रीकृत्यप्रयोजकत्वस्यैव विवक्षणीयत्वात् प्रतिपाद्यपुरुषीयज्ञानविषयिणीच्छारूपेच्छाजन्य जिज्ञासा अतस्तस्यास्य प्रतिपाद्यजिज्ञासा
त्वन्तमिति ९

बुबोधयिषाभिन्नकालातरीयाजिज्ञासाप्रादायेतिबोध्यं

(घटादिज्ञानं घटादिविषयकप्रवृत्तिविषयत्वं
प्रत्यक्षोपजीवकजिज्ञासात्वं) ४

ग्रि०दी०जा० ज्ञानवदं जन्येवमपि ज्ञाननिष्ठेष्टसाधनत्वस्यापि जिज्ञासाजनकज्ञानविषयत्वात्तत्राति व्याप्तिर्न च तस्य कारणतारूप
संगतित्वेन लक्ष्यत्वेनेतिवाच्यं निरूपणविषयकारणत्वादीनामेव संगतित्वात् अनुमानादिज्ञाननिष्ठेष्टसाधनतायाः
१० प्रत्यक्षानुमानादिसंगतित्वविरहात् न च जिज्ञासां प्रति असाधारणकारणत्वमेव विवक्षणीयं इष्टसाधनताज्ञा
नं तु उपायज्ञानाभावे प्रत्येव जनकं इति न तस्य जिज्ञासां प्रत्यसाधारण्यं प्रतिनत जनकताया इष्टसाधनत्वे
तिव्याप्तिरिति वाच्यं जिज्ञासां प्रत्यसाधारण्यकारणत्वं हि जिज्ञासात्वघटितधर्मावच्छिन्ननिरूपितकारणतावत्वं
तच्च ज्ञानगोचरइष्टसाधनताज्ञानस्याप्यस्ति तमेव ज्ञानगोचरेच्छात्वस्येव तज्जन्यतावच्छेदकत्वात् एकोपायध
र्मिकेष्टसाधनताज्ञानात् अन्योपायविषयकेच्छानुदयात् उपायविशेषविषयकत्वमेव तद्धर्मी इष्टसाधनता
विषयउपायेच्छाहेतुत्वकल्पनात् यदि च समानविशेष्यतासत्त्वात् स्वेव इच्छां प्रति इष्टसाधनताज्ञानस्य हेतुता
कल्पनेनोक्तातिप्रसंगवारणसंभवाद् विशिष्य ज्ञानादिरूपोपायविषयकत्वमिष्टसाधनताधीजन्यतावच्छेदक
कोटौ न निवेश्यते तथापि जिज्ञासात्वघटितधर्मो निष्ठसाधनताज्ञानजन्यतावच्छेदककोटौ समानविषयकान्य रुक्षेपर्य
इति तस्य जनकताविशेषणत्वात् इष्टसाधनताज्ञानजनकताव्याप्तिरिति तु व्येतत्वादस्य एव इष्टसाधनता
ज्ञानानात् कस्योपजीवकत्वादिप्रकारकज्ञानस्योपजीवकजिज्ञासाजनकताया अप्रामाण्याभावेन निरुक्त जनक
तायाएवाप्रसिद्धिः न च सामान्यधर्मे ज्ञानस्य विशेषजिज्ञासां प्रति कारणत्वांतरं अन्वयव्यतिरेकसिद्धं मत्यक्षा
१०

अनुमान१७

वं पूर्ववमेव घटत्वादिज्ञानं विना को घट इत्यादि प्रश्नमूलकीभूततायाजवांतरधर्मप्रकारेणघटादिज्ञानेच्छाया अनुत्पादस्या
नुभवसिद्धत्वादिति वाच्यं विशेषधर्मप्रकारेणघटज्ञानं भवत्वित्याकारकताद्दशजिज्ञासाजनकताद्दशज्ञानत्वावच्छि
न्नधर्मिकेष्टसाधनताज्ञानस्य घटत्वादिरूपसामान्यधर्मप्रकारकत्वनियमात् सामान्यधर्मप्रकारकज्ञानाभावस्य
लेताद्दशेष्टसाधनताज्ञानाभावनियमात्तत एव तथाविधेच्छानुत्पादोपपत्तेः रूक्तयुक्त्या सामान्यधर्मप्रकारकज्ञानस्य
का१५) कारणत्वांतरासिद्धेरिति चेत् जनकज्ञानविषयेत्यनेन जनकीभूतेष्टसाधनताज्ञानीयज्ञाननिष्ठविशेष्यतायां विषयि
तासंबंधेन यदवच्छेदकत्वं तन्निरूपितावच्छेदकतात्मकविषयताविशेषस्य विवक्षितत्वात् ताद्दशविषयताविशेषत्वा
श्रयेवार्थपरं किमस्योपजीवकमित्यादिजिज्ञासाप्रयोजकीभूतोपजीवकत्वाधेकेष्टत्तरवर्तित्वादिवारणाय ता
द्दशविषयतापर्याप्त्यधिकरणत्वं निवेश्यं तच्छ्रमायैव वा तत्र यद्यपि जिज्ञासानिरूपितज्ञाननिष्ठविषयतावच्छेदकता श्रीपे
वच्छेदकत्वविशेषस्यापि लघोर्लक्षणत्वसंभवति तथाप्यत्र लक्षणे तन्निवेशानवैयर्थ्याविकाशः इच्छादीनां या चितमं
डलन्यायेन जनकज्ञानविषयत्वेयेवसविषयकत्वमिति प्राचीनमताभिप्रायेणैव वा जनकज्ञाननिवेशनं विषयनिष्ठ साम
प्राप्यस्त्रकाय धर्मितावच्छेदकतायां येन संबंधेनावच्छेदकीभूतयोः धर्मस्तेन संबंधेनतद्वत्त्वमेकसंगतत्वव्यवहारनियामकं तेन स्वरू उपजीवकत्वे
पादिसंबंधेनोपजीवकत्वादिप्रकारिकाया उपजीवकज्ञानं भवत्वित्याकारकजिज्ञासा तद्विषयीभूतोपजीवकत्वादेः का
लिकादिसंबंधेनाधिकरणे काव्यादौ नातिप्रसंगः आयतेवेतियतः कार्ये ज्ञाते कारणत्वस्य ज्ञानात् कारणज्ञानमिष्टसा

सि०दी०गा०

२२

धनमित्याकारककारणत्वविषयकज्ञानात् किमस्य कारणमिति प्रश्नप्रयोजिका कारणे ज्ञाते कार्यं तस्य ज्ञानात् कार्य
ज्ञानमिष्टसाधनमिति कार्यत्वविषयकज्ञानात् किमस्य कार्यमिति प्रश्नमूलीभूता जिज्ञासा जायते अतः कार्यकारणा
भिधानानंतरं तत्कारणकार्याभिधानप्रयोजकतादृशतादृशजिज्ञासाजनकज्ञानविषयत्वात् कारणत्वस्य कार्यत्व
स्य च संगतित्वं न तु कार्यत्वस्यैवेत्यर्थः। सप्रसंगउपोद्घातोवसरो हेतुता तथा। निर्वाहकैक्यकार्यैक्ये षोढासंगतिरिष्य
त इति संगतिपरिगणने हेतुतापदं जन्यजनकत्वार्थकं तथा कार्यत्वकारणत्वोभयसाधारणेन केनचिद्रूपेण तदुभयपरमि
ति नाधिक्यमिति भावः। अत्र स्मृतस्योपेक्षानर्हत्वं प्रसंग इति प्रसंगलक्षणं तत्र स्मृतस्य रूपं निर्दिष्टवस्तुसंबंधेन स्मृ
तस्य उपेक्षानर्हत्वं द्वेषज्ञानविषयताविरोधिरूपं जिज्ञासाविषयतावच्छेदकरूपमिति यावत् स्मृतस्यत्यभिधाने जिज्ञा
साया अनंतराभिधानप्रयोजकत्वलाभाय उपोद्घातादिपंचकभिन्नत्वे सतीति निरूपणीयं तथा च उपोद्घातादिपंच
कभिन्नसंगतिः प्रसंग इति पर्यवसितार्थः। तेनाधेयत्वाधिकरणत्वघटत्वादीनामपि संग्रहः विशेषसंगतिसामान्यलक्ष
णाक्रांततया प्रसंगाद्यनंतर्भावेऽकसंगतिपरिगणनविरोध इति निरस्तं तेषां सर्वेषामेव यथायथं व्याख्यातप्रसंगलक्षणा
क्रांततया तत्रैवांतर्भावात्। उक्तरूपं च विषाजकमात्रं अनस्तथाविधरूपेण तादृशधर्माणां निरूपणप्रयोजकजिज्ञा
साविषयतावच्छेदकत्वविरहेपि न क्षतिः एवं संगत्यंतरेपि बोध्यं यद्यपि नेदमतिविश्यस्सर्वासंगतिप्रसंग एवांतर्भावयितुं श
क्यते तथापि विभाजकस्य स्वतंत्रेच्छतया न पर्यनुयोगावसरः। उपोद्घातः प्रकृतोपपादकत्वं तदुक्तं चिंतां प्रकृतसिद्ध्यर्था २२

प्रत्येकरूपेण वतादृशरूपाणां तानं जिज्ञासाजनकं न तु प्रसंगत्यादित्येतदर्थः

तथा तदुपपादकं तेन विना तदघटितत्वे सति स्वैवाचिवाहितत्वंत्वमुपपादकेषूपोद्घात

मुपोद्घातं विदुर्बुधा इति प्रकृतसिद्ध्यर्थां प्रकृतोपपादकविषयिणीं किमस्योपपादकमिति चिंतां उपोद्घातं उपोद्घातसंग
तित्वनिर्वाहिकां विदुरित्यर्थः। तादृशजिज्ञासाजनकतयैव उपपादकत्वे संगतिलक्षणसमन्वयादिति भावः। उपपादक
त्वं च निर्वाहकत्वं तच्च कचित् घटकसाधकतया कचित् तत्तद्घटकत्वमेवं तत्र यथा विशिष्टपरामर्शत्वस्यानुमितिज
नकतावच्छेदकत्वं अनुमितिलक्षणघटकं तत्साधकतया तदुपपादकत्वं तत्साधकयुक्तेरिति युक्त्यभिधानरूपत

रूपत्वम्

अनुमितिलक्षणो

दाहरणम्

व्यवस्थापनलक्षणोपोद्घातः संगतिः एवमाचारप्रयोजकत्वं वेदस्य साक्षात्प्रवर्त्तकस्य वाक्यार्थज्ञानजनकत्वा
त्समितिप्रवर्त्तकज्ञाने आचारप्रयोजकताघटकतेन प्रकृतोपपादकम्बिसुपोद्घातसंगत्या विधिवादे प्रवर्त्तकज्ञाननि
रूपणं। सामान्यप्रत्यासत्तेरनुमितिरवनियमतो विशिष्टपरामर्शनिर्वाहकतया विशिष्टपरामर्शत्वावच्छिन्नानुमितिक
रणतानिर्वाहकत्वादेव तद्घटितानुमितिलक्षणोपपादकत्वं न तु तादृशलक्षणघटकतया एवमन्यत्रापि हि विधमुप
पादकत्वं यथासंभवमूह्यं। अवसरसंगतिरग्रे विवेचनीया हेतुता विवेचितैव। निर्वाहकैक्यं। एकनिर्वाहकनिर्वाह्यत्वं तद
न्यत्वे सति तन्निर्वाहकनिर्वाह्यत्वमिति यावत् कार्यैक्यं एककार्यप्रयोजकत्वं तदन्यत्वे सति तत्प्रयोज्यकार्यप्रयोजकत्वं नि
र्वाहकैककार्यत्वे इति पाठश्चिंतनीयः। तथा सति एकनिर्वाहकनिर्वाह्यत्वाला साद्यनिर्वाहकत्वस्य उपपादकतारूपत्वेन उ
पोद्घातेन गतार्थत्वात् प्रयोजकतारूपत्वे हेतुतांतर्भावात् तत्सरूपसंगतेश्च निर्वाहकत्वमेकनिर्वाह्यनिर्वाहकत्वं निर्वा
हकत्वं च प्रयोजकत्वं एककार्यत्वमेककारणकार्यत्वमित्यर्थकत्वे तु न कश्चिद्दोषः सर्वत्र तत्तदाकारकजिज्ञासाजनकता

विशिष्टपरामर्शत्वावच्छिन्नेनानुमितिनिर्वर्तितासंपादकतया अनुमितिलक्षणघटकविशिष्टपरामर्शत्वावच्छिन्नानुमितिकरणताप्रतिपादकत्वं
पादकत्वमेवानुमितिलक्षणोपपादकत्वं तु न नियत। तादृशघटकतया तत्संपादकत्वं च तत्प्रयोजकत्वं तत्त्वस्वरूपसंबंधविशेषः।

५६१·भ·११११०

सिन्दी०गा०

३२

लक्षणसमन्वयः।कार्य्यैः इदंत्ववधेयं।किंप्रत्यक्षोपजीवकमितिजिज्ञासयानन्तुमानमचनिरूपितमपितुकिमनुमा
नमितिजिज्ञासयैव।न्यासत्येवानुमानत्वरूपलक्ष्यतावच्छेदकविशिष्टेलक्षणप्रतिपादकस्यतत्करणमनुमा
नमित्युत्तरस्यसंगतेः।अन्यथाग्रंथांतरत्वप्रसंगात्।किंप्रत्यक्षोपजीवकमितिजिज्ञासायाःप्रत्यक्षोपजीवकत्ववि
शिष्टेऽनुमितिकरणत्वरूपविशेषधर्मबोधकवाक्यस्यैवनिवृत्तेः।तथाचानंतर्याभिधानप्रयोजकजिज्ञासाज
नकज्ञानविषयत्वरूपंसंगतित्वंप्रकृतेनोपजीवकत्वेसंभवतीतिनाहपूर्वा।जिज्ञासाजनकनिरूप्यतावच्छेदकधर्म
प्रकारकस्मरणप्रयोजकनिरूप्यनिष्ठसंबंधःसंगतिरित्येवलक्षणंयुक्तं।प्रत्यक्षानुमानपदार्थयोरुपजीव्योपजी
वकभावसंबंधज्ञानादनुमानपदार्थत्वरूपप्रकृतलक्षणलक्ष्यतावच्छेदकप्रकारेणानुमानस्मरणादनुमानपदा
र्थःकइतिविशेषजिज्ञासयाऽनुमितिकरणमनुमानपदार्थइतिनिरूपणादुपजीवकत्वेसंगतित्वनिर्वाहात्।एवं
चसर्वत्रपूर्वापरनिरूपणविषययोःसंबंधएवसंगतिः।नतुनिरूप्यतावच्छेदकःएतदनुसारेणैवप्रसंगादिसंगतिस्व
रूपाण्यस्माभिर्नीतिकृतौविस्तारेणोक्तानि।इत्थंचाउपजीवकत्वस्यानंतर्याभिधानाव्याप्यस्यापिसंगतित्वेचातुल्यत्वेपि।प्रत्य
क्षसाधारणत्वेपिनक्षतिः।नसंगतिप्रदर्शकपंचम्यनुपपत्तिः।पंचम्याहेतुत्वपर्यवसानादित्यादिवक्तज्ञानप्रयोज्यत्वार्थकत्वेनतु
ज्ञानजन्यत्वार्थकत्वंतिभावः।व्याख्यांतरेनहीत्यनेनपौनरुक्त्यापत्तेः।ननुपूर्वोक्तापरिहारायअनुमानोपमानयोरपि
संगतिप्रदर्शनंनतुचितमितिबहुवादिसंमतत्वादुपमानात्प्रागित्यपितत्संगतिप्रदर्शनपरमेवसविष्यतिसाचकथमुपमान ३२

ग्रंथएवनप्रदर्शितेत्याशंकायामाह।लाघवायेति।अनुमानस्यैवोपमानस्यापिप्रत्यक्षसंगतत्वात्प्रत्यक्षनिरूपणाव्य
वधानेनोपमानमेवकिंननिरूपितंउपमाननिरूपणानंतरमप्यनुमाननिरूपणसंभवादितिक्रमनियामकाकांक्षायाःइति
उत्थाप्यतत्प्रतिहृत्तयेक्रमनियामकाभिधानव्यंतावतैवसंगतित्वाभावोपिभवतीतिग्रंथांतरेसंगतिप्रदर्शनाभिप्रेत्ययाऽजनकम
नियामकाभिधानस्यसंगतिपरत्वेलाघवमितिभावः।बहुवादिसंमतत्वस्यप्राथमिकजिज्ञासानिर्वाहकत्वेनप्राङ्निरू
पणप्रयोजकत्वंघटयति।सुप्रसिद्धत्वेति।सुप्रसिद्धत्वसुज्ञातपदत्वेजिज्ञासाप्राथम्येहेतुविप्रतिपत्तिकत्वेनेत्यंतंसुप्रतिप
न्नत्वेहेतुः।अनुमानएवेतिरवोक्तेवकारार्थंविवृणोतिनोपमानइति।अप्रसिद्धत्वदुरूहत्वेप्रथमतोजिज्ञासानुत्पादकहेतुवि
प्रतिपत्तिकत्वेत्यंतंदुरूहत्वेहेतुः।सुप्रसिद्धार्थस्यबहुधाप्रस्तावोभवतिअतस्तज्ज्ञानस्यप्रयासानुपयोगः।नत्वप्रसिद्धार्थ
ज्ञानस्येतितत्ज्ञानस्यवक्ताप्रयासानुबंधित्वेनप्रथमतोवक्तवान्निवोभवतिस्वस्वीकृताग्नेःप्रायादितितेनतत्ताभ्यासाभ्याम
तिबंधात्वलताहरतार्थप्रथमतोजिज्ञासेतिभावः।औत्सर्गिकी।प्राथमिकी।इदंदुरूहत्वज्ञानस्यवक्ष्यैदूषसंपादकत
याजिज्ञासाविरोधित्वंकस्यचिदितितज्ज्ञानाधीनसुखदुःखयोर्न्यूनाधिकभावज्ञानरहितस्येत्यादिनन्येतावताक
मनियामकत्वेपिसंगतित्वंलब्धैवतुक्करूपस्यसंगतित्वविरहादित्याकांक्षायामाह।तथाचेति।अनुमानेनैवउपमाना
पेक्षयाप्राथमिकजिज्ञासाविषयत्वप्रयोजकबहुवादिसंमतत्वकथनेनविरोधिस्वतानुमानजिज्ञासायाविषयसिद्धा
निवृत्तेस्तस्यामुपमानंनिरूपणीयमितिसरचनादितिभावः।ननुविरोधिजिज्ञासानिवृत्तिरवसरःस्यादेवोपमानाभि

भाकरे। नुलतावे

दि॰टी॰व्या॰ ज्ञानप्रयोजकजिज्ञासाविषयतावच्छेदकमिति कथं तत्र दर्शितलक्षणसमन्वय इत्यत आह यथा चेति तथा वक्तव्य
मिति। अयमाशयः विरोधिजिज्ञासानिवृत्तिर्नावसरः अपि तु तन्निवृत्तेरेव सत्यामवश्यवक्तव्यत्वमेवं तत्र किमिदा
१२ नीं वक्तव्यमिति जिज्ञासाजनकज्ञानविषयतामादाय लक्षणसमन्वयः यद्यपि तादृशजिज्ञासाविषयतायां जिज्ञा
सानिवृत्तिघटितं नावच्छेदकमिति तेन रूपेण संगतित्वं नास्ति अपि तु निरुक्तमुपलक्षितं तत्काव्यवक्तव्यत्वं तत्स्वरू
पेणैव तथापि न क्षतिः यादृशस्य संगतित्वं तादृशस्यैव सादृश्यस्यैव विभाजकत्वमिति। नियमाजिज्ञासानिवृत्तेर्विभा
जकधर्मघटकत्वे बाधकाभावादिति। सा च सौमाण्यं मतमाह। शब्दांतरेति। द्वितीयांतरयानुमानमित्यस्य प्रथमेतकं त
थाविधत्वं विशेषणं। शब्दांतरसमयग्राहकमिति अतिदेशवाक्यस्थस्य उपमानग्राह्यशक्तिकगवयादिपदमि
त्यवादिशब्दस्यशक्तिग्राहकं गोपदं गोत्वविशिष्टवाचकं तद्विशिष्टविषयकशक्तिमत्त्वमाद्यजन्यशाब्दबोधजनक
त्वादित्याद्याकारकमित्यर्थः। तादृशानुमानेन विना शक्तिग्रहणातिदेशवाक्यजन्यशाब्दबोधस्तुल्यत्वादुपमानान
वतारात्तस्योपमानेऽपेक्षणीयतेति भावः। सप्रवृत्तिनिमित्तकत्वेति गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादिति सा
मान्यतो गवयत्वप्रवृत्तिनिमित्तकत्वसाधकमित्यर्थः। तादृशानुमानेनैवोपमानाप्रामाण्यवादिनस्तत्सकं विशेषतः
प्रवृत्तिनिमित्तपरिछेदस्तूपपादयंति गोसादृश्यस्य गवयत्वजातेश्च [illegible] पस्थितो सादृश्यस्य प्रवृत्तिनिमित्तत्वे गो
त्वं जातिविशेषस्य तथात्वे लाघवमिति लाघवप्रतिसंधानवशेन सामान्यतः सप्रवृत्तिनिमित्तकत्वस्य व्याप्यतया हि १२

तादृपि लिंगाद्विशेषतो जातिविशेषप्रवृत्तिनिमित्तकत्वानुमितिसंभवात् सिद्धांति मिश्रस्तु व्याप्यत्वावच्छेदकेनैव रूपेण सा ध्य
ध्यमनुमितौ भासते इति नियमसंभवकं च उपमानप्रामाण्यव्यवस्थाप्यते उपमानेन च गवयादिपदे विशेषतो गवयत्वा
दिप्रवृत्तिनिमित्तकत्वग्रहः संभवति गवयत्वादिप्रकारकसादृश्यज्ञानात्तद्रूपेण पदवाच्यत्वे गृह्यमाणे तदवच्छेदे गव
नैव ग्रहात् तादृशग्रहेऽपि गवयपदशक्तिरवश्यं किंचिद्धर्मावच्छिन्ना तत्र चानतिप्रसक्तस्य गोसादृश्यादेस्तत्तच्छक्ति
तानां चावच्छेदकत्वे गोत्वं जातिविशेषस्य तथात्वे च लाघवमित्याकारकस्तर्कोऽपेक्षितः अन्यथा तत्तच्छक्तिवादिप्र
कारेणापि सादृश्यत्वानसंभवात्तेषामपि प्रवृत्तिनिमित्तता सिद्धिप्रसंगात् तादृशलाघवज्ञानसंपादनेन दर्शितसा
मान्यतो दृष्टस्यापि तथाविधोपमानोपजीव्यत्वमित्यवधेयं। उक्तानुमानयोः सादृश्यज्ञानरूपोपमानस्वरूपस्तु
पजीव्यत्वयोस्तस्याप्युपजीव्यमनुमानमाह। अंततइति अदृष्टेति अदृष्टजनिका या विहितक्रियादिगोचरप्रवृत्तिस्त
त्प्रयोजकं समयादिपरिच्छेदकमनुमानमित्यर्थः। उपमानस्यापि अदृष्टजन्यत्वादिति भावः। निखिलोपमानस्यैव
निरूपणीयतया संगतिसम्पेक्षितं अतो निखिलमेवेत्युक्तं अनुमानेऽप्यदृष्टद्वारा समयपरिछेदकोपमानोपजीव
कताया क्वचित्त्वे नोपमाननिष्ठोपजीवकतायास्तत्तविशेषदर्शनाय निखिलमिति तु न सत् अनादौ संसारे सर्वत्रै
वानुमाने अविपरंपरया कादाचित्कस्य शक्तिपरिच्छेदकोपमानस्य मुक्ततासंभवेन तस्य तादृशविशेषासंभवात् यत्र
प्रत्यक्षादिरूपकृतिसाध्यता ज्ञानाधीना प्रवृत्तिरुपमानजनकीभूता दृष्टजनिका तत्रानुमानोपजीवकताया अपि ठक्करे

दिन्दी०गा०

१४

त्वेनोपपादनीयत्वात् केचित्त्यस्वरसस्वरसस्वनायस च वक्तुं वादिरिसंगतत्वकथनस्योपजीवकत्वसंगतिलाभासंपादकतया
तस्यानुपयोगितापत्तेनोपमानापेक्षयाऽनुमानस्यैव तु वादिरिसंगतत्वे प्रकाशवुपमानं कणादादिभिरनुमान एवा
न्तर्भावितमितिलभ्यतेतावतात् मतनिराकरणायानुमानभिन्नत्वेनोपमानानिरूपमिति स्वयत्वाभासेनानुमाननिरूपणो
पजीवकतायाउपमाननिरूपणेलाभसूचितदुक्तेरूपजीवकत्वसंगतिलाभोपयोगितेतिवाच्यं निरूपणयोरुपजी
व्योपजीवकभावस्यासंगतित्वात् क्रमनियामकत्वाभावे तदुक्तेर्वक्तुसंगतिलाभार्थत्वे चेत्तथापि तुपमानस्य संगत्य
प्रदर्शनेनन्यूनतापादुर्वारत्वात् स्वमते संगतेर्निरूपणपौर्वापर्यानियामकतया तन्नियामकाकांक्षयानिरू
पणयोः कार्यकारणभावं दर्शयति संभवति चेति द्वयोः प्रत्यक्षानुमानयोः सम्बन्धयोर्निरूपणान्वयिविषयित्वं
निरूपणयोर्निरूपणपदार्थघटकज्ञानयोः तथा च प्रत्यक्षोपजीवकत्वादित्यस्य प्रत्यक्षज्ञानजन्यत्वादित्यर्थः।
अनुमानभिन्नस्यानुमानज्ञानविषयत्वेनानुमानमर्थः। तदेकदेशज्ञाने च आश्रयत्वलक्षणः पंचम्यर्थोऽन्वेतीति भा
वः। अथ तत्पूर्वकमित्यादीति अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववच्छेषवत्सामान्यतो दृष्टं चेति विभाजकसूत्रस्
त्यर्थः तत्र पूर्ववदित्यादि। कारणलिंगकं कार्यलिंगकं तदन्यलिंगकं चेत्यर्थः। तस्य चेति प्रत्यक्षघटितविशेषणपु
रस्कारेणानुमाननिरूपणस्य चेत्यर्थः। प्रत्यक्षनिरूपणोत्तरं विशिष्टज्ञानस्य विशेषणज्ञानाधीनत्वादिति भावः। अ
नुमानभिन्नत्वेनेति वैशेषिकादिमतनिराकरणाय तेन रूपेणैवोपमानस्य निरूपणीयत्वादिति भावः॥ ॥ १४

तत्रेत्यादि आह तत्रेति तत्र एको ग्रन्थः। तत्र प्रतिज्ञायां सत्तम्यर्थो निरूपणान्वयिविषयत्वं लक्षणेति। लक्षणमितरभेदा
नुमापकं स्वरूपं लक्षणं गृहाणयोगि अनुमितिकरणताच्छेदकरूपं तच्च लिंगपरामर्शत्वं। प्रामाण्यं प्रत्यक्षा
तिरिक्तप्रमितिकरणत्वं आदिपदादिप्राजकरूपपरिग्रहः। निरूपणीयप्रतिपादनीयेत लक्षणमनुमानलक्षण
माहेत्यन्वयः। सतिसप्तम्याः प्रयोजकत्वमर्थः लक्षणाभिधानस्य निरूपणात्मकतया प्रयोज्यप्रयोजक
भावासंभवेऽपि सविशेषणे हीत्यादिन्यायाभिरूपणघटकप्रतिपत्त्यंशे लक्षणाभिधानस्य प्रयोज्यप्रयोजक
भावता स्वस्वरूपादिप्रतिपत्त्यर्थितस्य पिधानप्रयोजकाकांक्षोत्थापकतया लक्षणाभिधानस्य प्रयोजक
त्वंबोध्यं। ननु प्रमाणलक्षणात्प्रागेव कथं प्रमालक्षितान च प्रमाणलक्षणस्य प्रमाघटिततया तामविज्ञाय
न तद्ज्ञातुं शक्यते इति प्रमालक्षणप्राथम्यबीजं तथा सत्यनुमितिलक्षणघटकव्याप्त्यादेरपि प्रथमं निरूपणा
पत्तेः इत्याकांक्षायां मनुमितिलक्षणप्राथम्यबीजांतरमाह। करणस्येति अनुमानस्येत्यर्थः। क्रियाभेदे
ति। क्रियाया अनुमितेर्भेदः प्रत्यक्षविजातीयत्वं तद्धि प्रमर्तितकतया तदधीनं यत्प्रत्यक्षकरणताभिन्न
प्रमाणांतरव्यवहारोपयिकप्रमित्यंतरकरणतात्मकं स्वरूपं तच्च यातथा च प्रत्यक्षानंतरमनुमानं निरूप्य
त इति प्रतिज्ञातः प्रत्यक्षतोऽनुमानं प्रमाणांतरमितिलाभात् तत्र कथं तन्निरुक्तपेतत्प्रमाणांतरतानिर्वाहक
प्रमितिवैलक्षण्यलाभायतल्लक्षणाभिधानमेव प्रथमतः क्रममितिभावः। केचित्तु तत्रेति प्रकपाठधारणं

प्रत्यक्षप्रमाणानन्तरं अनुमानस्य निरूपणे प्रकरणसंगतिरिति
सामान्य।

निरूपणं हि प्रथमाभंगतु लक्षणादिप्रकारकज्ञानानुकूलशक्तिरेव पितः शाब्दः ॥ लक्षणस्वरूपप्रामाण्यादिविषयैरनुमानेनिरूपणीयेइति दीधितिसंगतेः ॥ लक्षणस्वरू
पादिप्रकारकलक्षणादिप्रकारकज्ञानजनकानुकूलशाब्दविषयेइत्यस्यापन्नेः ॥ इति यदा दीधितिलेनैवानुमानस्य परामर्शस्य विनुमर्हतिमलक्षणादिप्रका
रकज्ञानानुकूलशाब्दविषयत्वेनसाधितुमर्हति ॥

शि०दी०मा० लक्षणेत्यादिनिरूपणीयइत्यंतं तस्य व्याख्येति नानुमानेनिरूपणीयइत्युपाध्यायादिव्याख्यामालोच्य वदंति तदस
त् लक्षणस्वरूपप्रामाण्यादिप्रकारकत्वेननिरूपणस्याप्रकांतत्वात् व्याख्यामध्येतत्तीयांतभागकथनविरोधा
२५ त् न च स्मरणसंबलितेयं व्याख्येति युज्यते तत्तद्दोषपरिहारोप्युपपत्तेर्निरूपणे स्मरणीयत्ततीयांतार्थान्वयायोगात्स्मरण
स्यानुपयुक्तत्वाच्च न च सप्तम्यर्थो नुमितिरन्वयितद्विषयकनिरूपणप्रकारत्वं तत्र लाभाय स्मरणमनुचितमिति वाच्यं ता
दृशार्थे क्वचिदपि सप्तम्यदर्शनात् मूलस्थतत्तच्छब्दस्यानुमानपदार्थपरतया घटकत्वस्य निरूपणपरं तेयां विषयत्वस्य
वा तत्त्वसप्तम्यर्थत्वात् । यत्तु सतिसप्तम्येवेयं तदर्थः प्रयोजकत्वं एवं चानुमाननिरूपणानुमितिनिरूपणयोः प्र
योज्यप्रयोजकभावलाभायेव स्मरणमिति तदसत् तत्मसत् निरूपणस्य तत्प्रयोजकत्वे प्रयोज्यत्वेनक्रियात्वात्सावेन यस्य च
सावेन भावलक्षणमिति स्मर्यविषयतया सतिसप्तम्यनुपपत्तेः न च निरूपणीयइत्यपि स्मरणमतो नैयमनुपपत्तिरि
ति वाच्यं एवमप्यनुमितिनिरूपणस्यानुपस्थितत्वात्तत्र प्रयोजकत्वान्वयासंभवात् न च मूले नुमितिरित्यनंत
रं निरूप्यत इत्यपि स्मरणमतो नैयमनुपपत्तिरिति वाच्यं तदकथनेन दीधितिकृतो न्यूनतापातात् लक्षणमध्ये नि
रूपणमतिप्रसंगतरासंगतेश्चेति दिक् ॥ ॥ उपाध्यायव्याख्यामनुपन्यस्यति अत्रेत्यादिना आहुरित्यंतेन अत्र एत
ल्लक्षणे अर्थ इत्यनेनान्वयः एतल्लक्षणवाक्यप्रतिपाद्यमित्यर्थः ॥ अयथव्याचक्षत इत्यस्य केनाप्याहुरित्यनेनान्वयः ॥ व्याप्ती
ति अत्रैस्य पक्षसामानाधिकरण्यावगाहित्वमेकधर्मिण्युभयसंबंधावगाहित्वं संबंधसंबंधस्यौ विशिष्टज्ञानविषयतायाः शि० २५

व्याप्तिविशिष्टस्य समानाधिकरणपक्षधर्मतावगाहिज्ञानजन्यत्वमित्यर्थः ॥ प्रस्तत्यर्थतावच्छेदकरूपतावार्थ एवतत्त्वमत्यपरस्यानुविशिष्टत्वात् सामानाधिकरण्यस्या
तयात्तत्त्यस्याधायेन ज्ञानान्वयासंभवाद्व्याप्तताव्यासंगतेः ॥ ऽन्यार्थ्यपि सामानाधिकरण्यांतेनोपलक्षणं किंतु विशेषणं ततो ज्ञानेन सममंतस्यान्वयात् के
वलपक्षधर्मताविषयधीनिरासः ॥

प्राचीनैरुपगमात् । अनुमितिजनकविशिष्टपरामर्शे व्याप्त्यादिसंबंधतया भासमानस्यापि तत्संबंधस्य संबंधो हेतौ भासत इति व्या
प्तिवैशिष्ट्यपक्षधर्मतयोः सामानाधिकरण्यावगाहितानिर्वहतीति लक्षणसमन्वयः ॥ पक्षधर्मता च पक्षानुयोगिको हेतुताव
च्छेदकसंबंधः ॥ ननु पक्ष इति त्वां पक्षविशेष्यकपरामर्शस्य पक्षवृत्तितानवगाहित्वात्तत्र अपि संबंधतया पक्षनिरूपितायत्वभा
हेतुतावच्छेदक नोपगमे पक्षस्य प्रकारतापत्तेः ॥ न च पक्षानुयोगिकसंबंधविलक्षणपक्षविशेष्यकपरामर्शे तादृशसंबंधस्य संबंधः पक्ष एव
भासते व्याप्तिसंबंधस्य संबंधो हेतावि ति नैकधर्मिण्युभयसंबंधावगाहित्वरूपसामानाधिकरण्यावगाहितानिर्वाह इति
वाच्यं विशिष्टबुद्धौ विशेष्ये संबंधस्यानुयोगित्वरूपसंबंधो विशेषणे च तस्य प्रतियोगित्वरूपसंबंधो भासत इति सिद्धांता
त् पक्षविशेष्यकपरामर्शेपि हेतौ व्याप्तिप्रतियोगिकसंबंधानुयोगित्वस्य पक्षानुयोगिकसंबंधप्रतियोगित्वस्य च भानेन
एकत्रोभयसंबंधावगाहितायाः अक्षतत्वात् । नन्वेवं व्याप्यविशेष्यकपरामर्शसंग्रहस्तत्र हि हेतौ पक्षानुयोगिकसंयोगा
दिरूपहेतुतावच्छेदकसंबंधो न पक्षरूपविशेषणस्य संबंधतया भासते विशेष्ये संबंधानुयोगित्वस्य विशेषणे च तत्प्रतियो
गित्वस्य भानं नियमात् तादृशज्ञानस्य हेतुपक्षयोर्बाधितसंयोगाद्यनुयोगित्वप्रतियोगित्वावगाहित्वे भ्रमत्वप्रसंगात् त
त्रैह परीत्ये च विशेष्यविशेषणभावे वैपरीत्यप्रसंगात् सामान्यवैशिष्ट्यप्रतियोगित्वानुयोगित्वयोरेव विशेषणविशेष्यभा
वकत्वात् संपूर्णत्यानुयोगिकसंयोगादिप्रतियोगित्वरूपमाधेयत्वमेव सपक्षहेतुतावच्छेदकसंबंधः न वा पक्षानुयोगिकत्वमिवा
२३ यं संबंधसंबंधतयात्र संयोगादिरूपहेतुतावच्छेदकसंबंधप्रतियोगित्वस्य हेतावभानेपि विशेषणीभूतस्य संबंधतया

तत्र तद्भ्रमो हेवैकल्प्यव्याप्तिवैशिष्ट्यानुयोगित्वपक्षानुयोगिकहेतुतावच्छेदकसंबंधप्रतियोगित्वमानेनोभयसामानाधिकरण्या
वगाहितानिर्वाहात् अन्यथा तन्मतपक्षविशेष्यकपरामर्शस्यैवसर्वत्रानुमितिहेतुत्वापत्तेः नन्वेवमपि वह्निव्याप्यो धूमः इ
त्युपवर्तितज्ञानजन्येति व्याप्तिः ताहशज्ञानस्यापि धूमाभावात्मकत्वे कहेतोन्दुभयसंबंधावगाहित्वात् एकविषयतानि
रूपितोभयसंबंधविषयतापर्यन्तस्य लक्षणवाक्यतो लाभात् तदिविवक्षणे तथाविधव्याप्तिवैशिष्ट्यपक्षसंबंधविषयतानियमा
नैवोपपन्नौ हि होपेक्षाया निर्बीजत्वापत्तेः न चोभयसामानाधिकरण्यमेकनिष्ठापरसामानाधिकरण्यं तथा च पक्षसंबं
धनिष्ठव्याप्तिवैशिष्ट्यत्वसंबंधावगाहिज्ञानजन्यत्वमर्थः न तत्संबंधत्वेन तत्प्रतियोगित्वमेव उक्तसमनुपालंभनस्यैकवक्पद
धर्मतादिज्ञानस्य च वस्तुगत्या यो व्याप्तिवैशिष्ट्यवान् धूमादिः पक्षसंबंधनिष्ठतत्प्रतियोगिकत्वावगाहित्वेपि न क्षतिः तल्य
त्वयातेन्याहशाविशिष्टमुपस्थाप्यते ताहशविशिष्टस्यैव वैशिष्ट्यमवगाहित्वेविवक्षणीयमिति कथितज्ञानस्य व्याप्त्या
दिघटितताहशविशिष्टनिरूपितविषयताशून्यत्वेन लक्षणघटकत्वादिति वा व्याप्तिविशिष्टहेतुमान्पक्ष इत्येतादृश
परामर्शेसंयोगाद्यंशेसमानहेतुप्रतियोगिकत्वनिरूपितविषयतया व्याप्तिवैशिष्ट्यप्रतियोगिकत्वरूपविशिष्ट
विषयनिरूपितत्वेपि पक्षसंबंधनिष्ठत्वस्य विशेषणकोटावप्रविष्टत्वेन तद्घटितोक्तविशिष्टविषयनिरूपितत्वाभावेन
तत्संग्रहात् पक्षसंबंधनिष्ठत्वस्य उपलक्षणत्वेपि तत्विषयकज्ञानवारणासंभवात् भावप्रत्ययेन वा अवगाहित्वविशे
षणतया एकपदार्थतावच्छेदकनिष्ठापरतत्सामानाधिकरण्यं कथं प्रतिपाद्यनीयं भावरूपार्थ एव तदनुशासनात् प्रकृते २६

र्थसाधारणधर्मस्यैव भावार्थत्वात् न हि नीलोत्पलत्वमित्यादौ उत्पलत्वादिनिष्ठनीलिमादिसामानाधिकरण्यं प्रकृत्यर्थ
धर्मः तस्य नीलोत्पलत्वादिरूपप्रकृत्यर्थ्यवर्त्तमानत्वात् न चैकपदार्थनिष्ठापरपदार्थतावच्छेदकसंबंध एव पदार्थतावच्छे
दकद्वयसामानाधिकरण्यं प्रकृते च पक्षसंबंधप्रतियोगिनिष्ठव्याप्तिवैशिष्ट्यानुयोगित्वमेव तथा तत्त्वम् प्रकृत्यर्थसाधा
रणधर्म एवेति वाच्यं पृथिवीत्वमित्यादितो गंधाद्यप्रतीतेः प्रकृत्यर्थतावच्छेदकधर्मस्यैव भावार्थत्वस्वीकारेण कथि
तस्य प्रकृत्यर्थधर्मत्वेपि प्रकृतिजन्यबोधे प्रकारताविरहेण भावार्थत्वानुपपत्तेः न च रूपघटितसमासोपि संबंधावग
मस्तत्त्वस्यामित्यनुशासनाद्भावार्थमभिप्रोप्युक्तसंबंधस्तत्प्रत्ययार्थ एवेति वाच्यं तथा सति त्वसत्त्वेनारक्तीत्यादिवा
क्यजन्यबोधस्यात्र नीलोत्पलत्वमित्यादिवाक्यजबोधे ग्राह्याभावानवगाहितया रक्तत्वविरोधितानुपपत्तेः परामर्शविष
यव्याप्तिवैशिष्ट्यानुयोगित्वस्य विशेषणकोटौ पक्षसंबंधप्रतियोगिनिष्ठत्वाप्रवेशात् तत्प्रत्ययनिरुक्तविशिष्टविषयकत्वासं
भवेनतत्प्रत्ययेन ताहशविशिष्टार्थप्रत्यायनसंभवेप्यप्रतीकारात् अथ सामानाधिकरण्यांशेन व्याप्तिवैशिष्ट्यसामानाधि
करण्यांवच्छिन्नं पक्षधर्मत्वमेव विवक्षितं पदार्थतावच्छेदकद्वयसामानाधिकरण्यवचनत्वादि तस्याप्येकपदार्थताव
च्छेदकसमानाधिकरण्यापरपदार्थतावच्छेदकबोधकत्वादित्येवार्थद्वितीनयथाश्रुतासंगतिः उक्तं चोपाध्यायैरेव तदुक्तरत
त्प्रत्ययो व्याप्तिविशिष्टत्वे सति पक्षधर्मत्वं प्रापकमाहेति एवं च सामानाधिकरण्यं तथापि न भावप्रत्ययार्थता नीलोत्पल
त्वमित्यादित उत्पलादौ नीलाद्यभेदान्वयेन नीलापि भ्रोत्पलादेः प्रकृतितो लाभात् तादृशोत्पलादीतरावृत्तित्वसहितस्य क

त्रि०टी०गा० ९७ कतादृशोत्सवहत्तित्वेन चान्यलाभप्रविष्टत्वर्थपरित्यज्येतरांशेषु तथाभावप्रत्ययेन बोधनात्त्रीलाभिनोत्सलादिर्वत्तित्व
२७ रूपनीलिमादिसामानाधिकरण्यस्योत्सलत्वादौलाभनिर्वाहात् प्रकृते चतदितराहत्तित्वांशः साकल्यांशश्चोपलक्षणतये
विवक्षितो न तु ज्ञानान्वयिविषयविशेषणतया अतः परामर्शस्य तद्विषयकत्वेपि न क्षतिः व्याप्तिविशिष्टसामानाधिकर
ण्यं च व्याप्तिविशिष्टप्रतियोगिकत्वेन पक्षधर्मपदस्य प्रतियोगितासंसर्गेण पक्षानुयोगिकसमभिव्याहृतव्याप्तिघटकसं
बंधावच्छिन्नपरतया प्रकृत्यर्थतावच्छेदकतावच्छेदकसंबंधेनैव च प्रकृत्यर्थहत्तितायाभावप्रत्ययेन बोधनात् प्रतियोगिता
संबंधेन प्रकृत्यर्थहत्तिताया एव तत्पदोत्तरभावप्रत्ययतो लाभात् तस्या एव च तत्प्रतियोगिकत्वरूपत्वात्संबंधविधया
सामान्ये संयोगादौ तत्प्रतियोगिकत्वस्य तदीयसंबंधविधयाभानात् व्याप्तिविशिष्टप्रतियोगिकत्वमपि संबंधविषयता
यामवच्छेदकमिति व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नपक्षधर्मपदार्थतावच्छेदकपक्षसंबंधविषयताकत्वरूपं विशिष्टवि
षयकत्वं परामर्शे क्षतमेवेति चेन्न एवमपि व्याप्तिविशिष्टोयः पक्षधर्मस्तस्य तत्त्वेन तत्प्रतियोगिकत्वरूपसंबंधविशेषण
तयांतादृशपक्षधर्मत्वावच्छिन्नविशेषितत्प्रतियोगिकत्वावच्छिन्नविषयतायाएवविशिष्टान्वयबलेन लाभात् परामर्शे
च पक्षधर्मत्वावच्छिन्नस्य पक्षांशे प्रकारतया तदवच्छिन्नप्रतियोगिकत्वावच्छिन्नसंबंधविषयताकत्वविरहेण तदसंग्रहा
त् यदि च पक्षधर्मत्वमप्युपलक्षणमुच्यते तदाप्यभेदसंबंधेन पक्षधर्मत्वावच्छिन्नांशे प्रकारी पर्वतो व्याप्तिविशिष्टत्वावच्छि
न्नस्य उपलक्षणत्वेतद्देतगतव्याप्तेरपि तथात्वेन न तद्विषयकज्ञानाव्याहतेस्तस्य विशेष्यत्वेनोव्यात्पक्षांशे प्रकारी भवति २७

तेनेनरूपितनपक्षधर्मत्वोविषयत्वमानिरूपितावगाहित्वेनविषयताघाताभाव
उपलक्षणेविशेषणेमस्यरूपतानेभावाभिलाप्यायेतिभावः १

इती व्याप्तिप्रकारकपरामर्शस्यासंग्रहः अभेदेन व्याप्तिविशिष्टस्य हेतुविषयतानवच्छेदकत्वात् एवं भावप्रत्ययार्थप्रविष्टसक
लहत्तित्वं तन्निष्ठभेदप्रतियोगितानवच्छेदकत्वं साकल्यघटितान्यस्य दुर्वचत्वात् नानाव्यक्तिकस्य गुरुत्वादेर्यत्र प्रकृत्य
र्थतावच्छेदकता प्रत्येकं प्रकृत्यर्थनिष्ठभेदप्रतियोगितावच्छेदकस्यापि तस्यानुगततदवच्छेदकावच्छिन्नस्य तादृशभेदप्रति
योगितानवच्छेदकत्वमस्त्युपेयते न प्रसक्तदसंग्रहः अन्यथा यथाश्रुतेप्यनिस्तारः कस्याश्चिदपि गुरुत्वादिव्यक्तेः सकल
गुरुत्वादिमद्हत्तित्वाच्च नैवं गुरुत्वमित्यादितो नैयायिकादेरपि बोधापत्तिः तस्यापि गुणत्वावच्छिन्नस्य गुर्वादिनिष्ठभेदप्र
तियोगितानवच्छेदकत्वादिति वाच्यं गुणत्वावच्छिन्नेतदितरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वरूपतदितराहत्तित्वासत्वे
न तदापत्त्ययोगात् तदितरत्वव्यापकभेदप्रतियोगितावच्छेदकत्वावच्छिन्नतन्निष्ठभेदप्रतियोगितानवच्छेदकत्वस्य भावप्र
त्ययप्रहत्तिनिमित्तत्वात् तदितराहत्तित्वं तु न यथाश्रुतं प्रकृत्यर्थतावच्छेदकताघटकसंबंधेन हत्तेर्विवक्षणीयतया सत्वमि
त्यादौ सदितरसम्बन्धत्वासिद्धेः महानसीयवह्नित्वमित्यादौ गुरुवह्नित्वाद्यतिरिक्तेर्महानसीयवह्नित्वादेर्महानसीय
वह्न्यादिरूपप्रकृत्यर्थेतरपर्वतीयवह्न्यादिहत्तित्वेन तदितराहत्तित्वबोधासंभवाच्च तथा च कर्मधारयोत्तरभावप्रत्ययेन वि
शिष्टपदार्थतावच्छेदके विशेषणपदार्थतावच्छेदकसामानाधिकरण्यं कथं बोधनीयं हत्तेस्तस्य प्रवेशादिति महदसामंज प्रकृत्यर्थतावच्छेदक विशेषणः
स्योऽयं तन्निरुक्ततदितराहत्तित्वसहितसकलहत्तित्वस्य प्रत्याने नासयेन प्रकृत्यर्थमनंतर्भाव्य भावप्रत्ययप्रहत्तिनिमि
त्तत्वे सामान्यतदितरत्वव्यापकत्वस्य केवलान्वयिमात्रनिष्ठतया घटत्वावच्छिन्नभेदसाधारण्यविरहेण घटत्वादौ प्रथमद

म१९

शि० टी० गा० ध्यस्य बाधः इति भेदस्य प्रतियोगितानवच्छेदकत्वरूपद्वितीयदलमपि प्रमेयत्वावच्छिन्नेतरबाधितं घटेतरत्वव्यापकत्वा

१८ देश्वरस्य तया न बोधनिर्वाहः अतो धर्मत्वमेव तत्पदशक्तिनिमित्तमुच्यते धर्मत्वं च प्रकृतपर्याप्त्यवच्छेदकतात्मकसंबंधेन संबं

धितमेव घटत्वमित्यादितो द्रव्यत्वादिबोधः रूपादिबोधश्च भवतामपि समानः द्रव्यत्वादेरपि घटत्वविशिष्टतया घटेतरत्व

व्यापकभेदप्रतियोगितावच्छेदकत्वात् घटरसादेरपि घटरूपत्वावच्छिन्नस्य घटादिनिष्ठभेदप्रतियोगितानवच्छेदकत्वा

त् एवं गुरुत्वमित्यादितोपि गुरुत्वादिसमनियतरसादिबोधो भवतामपि दुर्वारः तदितरावृत्तित्वादिना भासमाने धर्मे तत्पद

प्रकृतपर्याप्त्यवच्छेदकनिष्ठाधेयतासंबंधेन प्रकृतपर्याप्त्यन्वयस्यानभ्युपगम्यत्वाद्वारणे च धर्मत्वेन शक्तिमतेपि धर्मत्वे प्रकृतपर्याप्त्यवच्छे

दकनिष्ठत्वसहितनिरूपितत्वसंबंधेन प्रकृतपर्याप्त्यन्वयस्यानभ्युपगम्यत्वात्तत्पदार्थतावच्छेदकनिष्ठाधेयतया धर्मांतरेऽसत्वेन ता

दृशातिप्रसंगो वारणीयः एवं च व्याप्तिविशिष्टाभिन्नपक्षधर्मप्रतियोगिकत्वेन पक्षसंबंधे व्याप्तिविशिष्टपक्षधर्मतापदेन बो

ध्यमाने भेदेन पक्षधर्मान्वयिनि व्याप्तिविशिष्टे विशेषणतायां च व्याप्तिवैशिष्ट्यस्यापि पक्षधर्मे विशेषणतया भानमुपेयं

एकविशेषणतयोपस्थितस्य पदार्थतावच्छेदकस्य स्वातंत्र्येणैवेतरविशेषणतया भानात् अन्यथा घटं जानातीत्यादौ घटत्वा

दिविशिष्टनिरूपितविषयताशालिज्ञानपर्याप्तस्य तादृशविषयत्वेपि भासमानात्पदार्थतावच्छेदकघटत्वादेः स्वावच्छिन्ननिरू

पितत्वसंबंधेन विषयतायामन्वये नैव तल्लाभसंभवे निर्वाहात् एवं च व्याप्तिवैशिष्ट्यविशेषितव्याप्तिविशिष्टाभिन्नपक्षधर्मत्वोपलक्षित

धर्मिप्रतियोगिकत्वमेव विषयतावच्छेदकतया विवक्षितमिति पक्षधर्मे व्याप्तिविशिष्टासेदनवगाहिपरामर्शस्यापि संग्रहः। व्याप्य १८

एवं व्याप्तिविशिष्टस्य हेतोः संयोगादिरूपसंबंधांशे भासमानप्रतियोगिकत्वांशे संबंधांशे च स्वभावरूपकं तथा च तद्घटित

त्व तस्य व्याप्तिविशिष्टप्रतियोगिकत्वे पक्षसंबंधाति त्रयविषयताया छेदकं संबंध ण ताक सं भं

पक्षवानिति ज्ञाने व्याप्तिवैशिष्ट्यस्य धूमाद्यंशे प्रकारत्वेपि तदंशे संबंधतया भानादेव धूमनिष्ठावच्छेदकतारूपविषयता

यामवच्छेदकत्वसंभवात् तद्घटितव्याप्तिविशिष्टधूमप्रतियोगिकत्वविशिष्टहेतुतावच्छेदकसंबंधविषयकत्वमव्या

हतं न च व्याप्तिविशिष्टस्य हेतोः संयोगादिरूपसंबंधांशे संबंधतया भासमानेन तत्प्रतियोगिकत्वेन हेतोः संबंधो

रवि तदभानात् संयोगादेः संबंधांतराभानाद् नदीयसंबंधांतरघटितव्याप्तिविशिष्टप्रतियोगिकत्वविशिष्टसं

योगादिविषयकत्वं वह्निव्याप्यधूमवानित्यादिबुद्धेर्दुरुपपादमेवेति वाच्यं तदवच्छिन्नविषयताकत्वरूपतद्विशिष्टवि

षयकत्वस्य तदीयसंबंधाभानेपि व्याहतेः। अन्यथा गुरुमते ज्ञानस्य विशिष्टविषयकत्वानुपपत्तेः तैर्विशिष्टबुद्धौ

संबंधभानानभ्युपगमात् न च वैशिष्ट्यांशे विशेषणीभवंत्या व्याप्तेर्व्याप्तिविशिष्टेत्यादिवाक्यजबुद्धौ संबंधसंबंधोप्यत

मते विषय इति तद्घटितमेव विशिष्टं व्याप्तिविशिष्टपक्षधर्मतापदार्थः तादृशविशिष्टं च कथं व्याप्तेः संसर्गतया त

द्वैशिष्ट्यावगाहिपरामर्शस्य विषय स्तत्र वैशिष्ट्यांशे व्याप्तिप्रतियोगिकसमात्रस्य तत्संबंधतया भानात् न तु संसर्गता

रस्येति वाच्यं वैशिष्ट्यांशे व्याप्तिसंबंधसंबंधाधिकरणस्य भानेपि तस्य वैशिष्ट्यनिष्ठविषयतावच्छेदकत्वाविरुक्षणस्य संभवेन

सामंजस्यात् न हि यस्मिन्विषये यस्य यत्संबंधभानं तन्निष्ठविषयतायां तदीयतत्संबंधावच्छिन्नत्वं विशिष्टवैशिष्ट्यबोधे भा

सत एवेति नियमः प्रामाणिकः घटं जानातीत्यादिवाक्यजन्यघटत्वादिविशिष्टवैशिष्ट्यबोधे घटादिविषयतायां समवा

यानुयोगित्वावच्छिन्नत्वमानस्यापि नियमेनानभ्युपगमात् अथ व्याप्तिघटकहेतुसंबंधावच्छिन्नबोधकपक्षधर्मपदोत्तर

शि॰दी॰प्रा॰ साध्यत्वस्य उक्तरीत्या प्रकृत्यर्थतानवच्छेदकसंबंधांतरव्यावृत्तहेतुप्रतियोगिकत्वबोधकतया संबंधांतरस्याव्यावृत्तत्वेन त
त्संसर्गकहेतुमत्ताज्ञानवारणेपि हेतुतावच्छेदकसंबंधसंसर्गकनिर्धर्मितावच्छेदकज्ञानवारणमशक्यमेव तस्यापि
१९ व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नतादृशसंबंधविषयकत्वात् न च पक्षपदस्य धर्मितावच्छेदकविशिष्टार्थकतया पक्ष
धर्मतापदेन धर्मितावच्छेदकविशिष्टधर्म्यनुयोगिकत्वावच्छिन्नसंसर्गबोधनात् तदवच्छिन्नसंसर्गावगाहिज्ञानमेव
ज्ञानांतार्थ इति निर्धर्मितावच्छेदकज्ञानव्यावृत्तिरिति वाच्यं पक्षधर्मतापदेन पक्षसंबंधिप्रतियोगिकत्वेनैव पक्षसंबंधबो
धनात् पक्षानुयोगिकत्वेन संबंधस्य तद्बोध्यत्वाद् एवं च संशयवारणाय ज्ञानपदस्य निश्चयार्थत्वमावश्यकं निश्च
यत्वं च विपरीतकोटिधर्मितावच्छेदकतानापन्नधर्मावच्छिन्नविशेष्यताकज्ञानत्वं तथा च तादृशविशेष्यताकत्वावच्छेद
न व्याप्तिविशिष्टप्रतियोगिकत्वावच्छिन्नावगाहित्वस्य विवक्षणात् हेतुमत्तानिर्धर्मितावच्छेदकं ज्ञानं न लक्षणघटकमि फ८
ति एवं च पक्षपदस्यानुपादानेपि सामंजस्यात् अनुपादानं धर्मपदस्य हेतुतावच्छेदकसंबंधप्रतियोगिपरत्वलाभायेति दिक्॥
अथवा धर्मांतरविशिष्टावच्छिन्नबोधकप्रकृतिकभावप्रत्ययः प्रकृत्यर्थतावच्छेदकधर्मान् तादृश्येणैव प्रत्याययति गुरु
त्वमेकत्वमित्यादितो जातिविशेषपुरस्कारेणैव गुरुत्वैकत्वादिगुणबोधनात् उक्तं च गुणदीधितौ प्रतीतिस्तु तादृश्येण धर्म
त्वेनैवेति न च प्रत्ययानंत्यप्रसंगात् न्यायेपक्षः साधुरिति वाच्यं तदादीनामुपलक्षणीभूतबुद्धिविषयतावच्छेदकत्वेन महत्ति
निमित्तघटत्वाद्यनुगमेन शक्त्यैक्यवत्प्रकृतेपि प्रकृत्यर्थतावच्छेदकतावच्छेदकत्वस्योपलक्षणेन प्रकृत्यर्थतावच्छेदकताव १९

शे